ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# साहित्यम् २

## मध्यमा १

## (ધોરણ 11)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 18.00**

**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषय-मार्गदर्शनम्**

डॉ. अमृतलालः भोगायता

**लेखनम्**

श्री भद्रेश व्यासः (कन्वीनर)
डॉ. भावप्रकाश गांधी
डॉ. गोपाल उपाध्यायः
श्री दुर्गाशंकर राजगोरः
श्री संजय ब्रह्मभट्टः
डॉ. सुरेश व्यासः

**समीक्षणम्**

श्री कालिदासः ठाकरः
श्री इन्दुशेखर भट्टः
श्री विरलः दवे
श्री धारिणी महेता

**भाषाशुद्धिः**

श्री अमृतलाल भोगयत

**संयोजनम्**

डॉ. क्रिष्ना दवे
(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **साहित्यम् २ मध्यमा १ (धो२ण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव ।

**पी. भारती** (IAS)
नियामकः | कार्यवाहकःप्रमुखः
ता.06-07-2019 | गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51–क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | नाटकम् - अभिज्ञानशाकुन्तलम् | 1 |
| २. | महाकविभासः - कर्णभारम्, स्वप्नवासवदत्तम् | 5 |
| ३. | नायक-नायिकाभेदाः | 12 |
| ४. | नारायणभट्टः - वेणीसंहारम् | 16 |
| ५. | शब्दशक्तयः | 22 |
| ६. | काव्यगुणाः | 30 |
| ७. | रीतयः | 33 |
| ८. | रसस्वरूपम् | 36 |
| ९. | नवरसाः | 41 |
| १०. | अलङ्काराः | 45 |
| ११. | काव्यप्रकाशपरिचयः | 49 |
| १२. | सूक्तयः | 52 |
| १३. | छन्दांसि | 55 |


•

# १ नाटकम् - अभिज्ञानशाकुन्तलम्

**नाटकम्**

काव्यं द्विविधम् - श्रव्यं दृश्यं च । श्रव्यकाव्यं तु श्रवणमात्रेण पठनमात्रेण वा केवलं साक्षराणां प्रगल्भानां रसिकानां कृते रसानुभूतिं जनयति, महाकाव्यादीनि तदुदाहरणानि । गद्य-पद्य-चम्पूकाव्यभेदेन श्रव्यकाव्यं त्रिविधम् । दृश्यकाव्यं तु दर्शनश्रवणमात्रेण निरक्षराणां सामान्यानां रसिकानां कृते अधिकां रसानुभूतिं जनयति । दृश्यकाव्येषु दश रूपकाणि सन्ति तेषु प्रथमं प्रधानं च नाटकं भवति ।

**काव्यम्**
↓
श्रव्यम् → गद्यम्, पद्यम्, चम्पूः
दृश्यम् → नाटकादीनि दश रूपकाणि

**दश रूपकाणि यथा -**

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥ ( दशरूपकम् - १/८ )**

नाटकं नाम कवित्वस्य अन्तिमं सोपानं वर्तते । तदुक्तम् 'नाटकान्तं कवित्वम्' इति ।

श्रव्यकाव्यानन्देन वञ्चिताः सन्तः अपि जनाः नाटकानां मनोहरम् अभिनयं दृष्ट्वा अलौकिकम् आनन्दं प्राप्नुवन्ति । काव्यं श्रवणमार्गेण हृदयम् आकर्षति स्वप्रभावं च जनयति परं नाटकं तु नेत्रमार्गेण हृदयम् आप्लावयति । कस्यचित् वस्तुनः पदार्थस्य वा दर्शनस्य आनन्दः तस्य श्रवणापेक्षया अधिकः भवति । काव्ये रसानुभूतये अर्थावगमनं नितान्तम् अपेक्षितम्, किन्तु नाटके न तथा । यतोहि चित्रेण सह नाटकस्य साम्यं प्रतिपादितम् भवति। यथा विभिन्नैः रक्तहरितवर्णैः आलेखितं चित्रं सहृदयानां दर्शकानां चित्तेषु रसं प्रवाहयति तथैव नाटकं वेशभूषा-नेपथ्य-सामग्री-संवाद-अभिनयादिभिः संविधानैः दर्शकानां हृत्सु गभीरं प्रभावं जनयति आनन्दानुभूतिं च कारयति । तदर्थम् एव संस्कृतवाङ्मये प्रख्यातेन अलङ्कारशास्त्रिणां वामनेन काव्येषु रूपकविधायै विशिष्टं महत्त्वं प्रदत्तम् । रूपकस्य वैशिष्ट्यस्य अन्यदपि कारणमेकं विद्यते तच्च-

काव्यस्य रसानुभूतये यथा तदनुकूलं वातावरणम् अपेक्षितं भवति तस्य निर्माणं सर्वेऽपि कर्तुं न प्रभवन्ति । काव्यं तु कल्पनया प्रसूते । अत एव काव्यरसास्वादः सहृदयानाम् एव भवति । अभिनये तावत् वेशभूषा-नानाप्रकारकाणि नेपथ्यानि-अन्यानि संविधानानि च उपयुज्जन्ते तैः रसास्वादनं भवति एव रसानुभूतये तादृशं वातावरणं स्वयमेव उत्पद्यते । कल्पनाकरणस्य आवश्यकता एव न भवति । अनेनैव कारणेन जनसामान्या अपि श्रव्य काव्यापेक्षया नाटकेषु विशेषेण आकृष्टाः भवन्ति । यथा आधुनिकचलचित्र - धारावाहिन्यादिषु ।

**''जनानाम् अभिरूचिः'' ।**

**नाटकोद्देश्यम्**

नाट्यशास्त्रस्य प्रवर्तकेन भरतमुनिना उक्तं यत् - नाटकं नाम 'सार्ववर्णिकः वेदः' ।

प्रत्येकं जनः अस्यानन्दस्य अधिकारी वर्तते । संसारेऽस्मिन् याभिः प्रवृत्तिभिः मानवजीवनं सुखमयं दुःखमयं वा भवति तासां सर्वासां प्रवृत्तीनाम् उत घटनानां चित्रणं नाटकस्य विशिष्टम् उद्देश्यम् । अत्र पुनरपि भरतमुनिः कथयति यथा -

**न तद् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।**
**न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥ ( नाट्यशास्त्रम् - १/११४ )**

ज्ञान-शिल्प-विद्या-योगकर्मभ्यः न एकमपि तादृशं विद्यते यन्नाटके न दृश्यते । तदर्थमेव महाकविना कालिदासेनापि विभिन्नरुचिमतां जनानां कृते नाटकं सर्वमान्यं मनोरञ्जनसाधनम् इति उक्तम् । तद्यथा -

**'नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम् ।' ( मालविकाग्निमित्रम् - १/४ )**

अनेन प्रकारेण नाटकेन सह चारित्र्यस्य उन्नयनम्, जीवनशैल्या: उदात्तीकरणम् आदर्शजीवननिर्माणं च इत्येतानि नाटकस्य जागरूकाणि उद्देश्यानि ।

**नाटकस्य उद्भवः प्रयोजनं च**

भरतमुनेः नाट्यशास्त्रे उल्लेखः लभ्यते यत् - नाट्ययाचनां कुर्वन् देवगणः ब्रह्मणः समीपं गत्वा कथयति यत्; अस्मिन् समये जनेषु ग्राम्यप्रवृत्तयः ईर्ष्या-द्वेषादिविकाराः वर्धमानाः सन्ति, जनाः च दुःखिनः सन्ति । तस्मात् भवान् अस्मभ्यं तादृशं क्रीडनकं मनोरञ्जनस्य साधनं वा यच्छतु यच्च दृश्यं श्रव्यम् इति उभयप्रकारकं स्यात् । पूर्वोक्तानुसारम् - अभिनययोग्यं काव्यं दृश्यं भवति तदेव 'नाटकमिति' व्यवहारः। अनेन स्पष्टं भवति यत् नाटकस्य प्रयोजनं मनोरञ्जनेन सहैव सदाचारशिक्षणमपि । वेदादीनि शास्त्राणि सार्वजनीनानि न भवन्ति इति हेतोः सर्वान् लाभान्वितान् न कुर्वन्ति, - तदादृताः कथाः नाटके सुरक्षिताः भवतुमर्हन्ति ।

**नाटकस्वरूपम्**

पूर्वोक्तानुसारम् - अभिनययोग्यं काव्यं दृश्यं भवति तदेव 'नाटकमिति' व्यवहारः। पुनश्चात्र प्रश्नः उदेति यत् - कश्चायम् अभिनयः ? अवसरेऽस्मिन् साहित्यदर्पणस्य रचयिता आचार्यः विश्वनाथः कथयति -

**भवेद् अभिनयोऽवस्थानुकारः स चतुर्विधः ।**
**आङ्गिको वाचिकश्चैवम् आहार्यः सात्त्विकस्तथा ॥ ( सा. द. ६.२ )**

नटेन अङ्गादिभिः कस्यचिदपि पात्रस्य क्रियमाणम् अवस्थानुकरणम् अभिनयः । सोऽयम् अभिनयः चतुर्विधः भवति; आङ्गिकः, वाचिकः, आहार्यः स्तम्भस्वेदादिभिः निष्पद्यमानः सात्विकश्च ।

नाटकस्य लक्षणं प्रतिपादयता कविराजेन विश्वनाथेन कथितम् -

**नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।**
**विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ।**
**सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।**
**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ।**
**प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवन्नायको मतः ।**
**एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा ।**
**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ।**
**चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपुरूषाः**
**गोपुच्छाग्रसमग्रं तु बन्धनं तस्य कीर्तितम् । साहि. ६.७ -॥**

नाटकस्य वृत्तान्तं पुराणेतिहासादिप्रसिद्धं भवेत् । शृङ्गारादिरसैः परिपूर्णं, सुखदुःखादिसमुत्पत्तियुक्तं, विलास-ऋद्धि-आदिगुणैः युक्तम्, अनेकविधैश्वर्योपेतम्, मुखप्रतिमुखादि- पञ्चसन्धियुक्तं नाटकं स्यात् । तत्र नाटकेषु अङ्कानां सङ्ख्या पञ्चतः न्यूनाऽ न च दशतः अधिका स्यात् । नायकः धीरोदात्तः राजर्षिः रामायण-महाभारत-पुराणादिषु वा क्वचित् प्रसिद्धः स्यात् । दिव्यः अदिव्य - दिव्य इति नायकः स्वीक्रियते । जनाः कार्यनिरताः भवन्ति । नाटकनिबन्धनं गोपुच्छाग्रसदृशं नाटके अङ्कानां निबन्धनं लघुबृहदपरिमाणयुक्तं सुव्यवस्थितं स्यादिति आशयः ।

**नाटकोत्पत्तिः**

नाटके शृङ्गार-वीर-करुणादिरसेभ्यः एकः रसः प्रधानः भवति, अन्ये च रसाः तदङ्गभूताः भवन्ति । शृङ्गभूताः भवन्ति । यथा शाकुन्तले च शृङ्गारः, वेणीसंहारे वीरः, उत्तररामचरिते करुणः इति ।

देवानां प्रार्थनां हृदये धृत्वा चतुर्भ्यः वेदेभ्यः सर्वेषाम् अपि जनानां मनोरञ्जनाय नाट्यवेदम् अरचयत् । तत्र विशेषेण यथा -

ऋग्वेदात् पाठ्यम्, सामवेदात् सङ्गीतम्, यजुर्वेदात् अभिनयम् अथर्ववेदात् नवरसान् च स्वीकृत्य चतुर्णां वेदानां योगेन नाट्यस्य रचना कृता ।

**अभिज्ञानशाकुन्तलम्**

उपरिष्टादुक्तानां नाटकीयतत्त्वानां साङ्गोपाङ्गसमन्वयः यत्र भवति तादृशं नाटकं अभिज्ञानशाकुन्तलमस्ति । अतः तस्य संक्षेपेण परिचयः अत्र प्रस्तूयते ।

अभिज्ञानशाकुन्तलं नाम नाटकं कालिदासस्य त्रिषु अपि नाटकेषु परमोत्कृष्टं मनोरमकथागुम्फनयुक्तं नित्यनवीन–अभिनवकल्पना–अलङ्कृतं भव्यं च अनन्यसामान्यम् । नाटकेऽस्मिन् शृङ्गाररसः प्रधानः विद्यते ।

विवेचकानां मतानुसारं संस्कृतकाव्येषु नाटकं श्रेष्ठम् अस्ति । तत्रापि अभिज्ञानशाकुन्तलम् अतीव रमणीयत्वं भजते ।

**'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' ।**

इत्येषा लोकोक्तिः अत्र पूर्णतया घटते नाटकेऽस्मिन् शृङ्गाररसः प्रधानः विद्यते । 'शाकुन्तलम्' तु कालिदासस्य सर्वस्वम् अभिधीयते । इदं नाटकं मनोविज्ञानदृष्ट्या पर्यालोच्यमानं किमपि अपूर्वम् आनन्दं वितनोति । तरुणहृदयस्य दुष्यन्तस्य, तरुण्याः शकुन्तलायाः सन्दर्शनारम्भात् कीदृशः नैसर्गिकः क्रमिकः च स्नेहविकासः जातः इति प्रदर्शयितुकामः इव कविः शकुन्तलायाः सर्वाङ्गीणं रूपनिरूपणम् अकृत्वा तत् तारुण्यमात्रलक्षकं वर्णनं **प्रथमाङ्के** करोति । **द्वितीयाङ्के** शकुन्तलाविषयकं स्नेहं विदूषकस्य पुरतः प्रकटयति । करभकस्य सन्देशानुसारं मातृकार्यार्थं सैन्यसहितं विदूषकं हस्तिनापुरं प्रति प्रेषयति ।

स्वयं च ऋषीणाम् आज्ञाम् अनुसरन् कण्वेन रहितम् आश्रमं राक्षसकृतविघ्नेभ्यः रक्षितुं तत्रैव वसति । **तृतीयाङ्के** शकुन्तलायाः वियोगावस्थायाः चित्रणं विद्यते, सख्यः शीतोपचारं कुर्वत्यः सन्ति दुष्यन्ताय 'काम' पत्रं लिख्यमानं विद्यते । स्वयं च दुष्यन्तः शकुन्तलायाः समक्षम् उपस्थाय गान्धर्वेण विधिना विवाहार्थं तां प्रेरयति ।

**चतुर्थाङ्के** दुर्वाससः शापवर्णनम्, सोमतीर्थात् प्रत्यागतस्य कण्वस्य केन प्रकारेण शकुन्तला गान्धर्वविवाहेन विवाहिता जाता इति – त्रिकालज्ञस्य काश्यपस्य ज्ञानम् शकुन्तलायाः च प्रकृतिवात्सल्यम् शार्ङ्गरवादिभिः सह पतिगृहं प्रति प्रेषणम् इति वर्णितम् अस्ति । अनेन सहैव कण्वः कथयति यत् –अद्य शकुन्तला पतिगृहं गमिष्यति । अनेन विचारमात्रेणैव मम हृदयं दुःखितं कण्ठश्चावरुद्धः । अहम् आरण्यकः सन् अपि कन्यायाः स्नेहेन व्याकुलः भवामि तर्हि गृहस्थानां तु कन्याविरहे कीदृशी परिस्थितिः भवेत्; प्रसङ्गमेनं वर्णयत् चतुर्थाङ्के श्लोकचतुष्टयमेतत् अतीव महत्त्वपूर्ण स्थानं भजते । तत्र श्लोकचतुष्टयं यथा –

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।**
**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥ १ ॥**

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ २ ॥**

**अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन –**
**स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।**
**सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया**
**भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ ३ ॥**

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ ४ ॥**

श्लोकैः एतैः ज्ञायते यत् महाकवेः कालिदासस्य नाटकम् इदम् सर्वोत्तमं सर्वोत्कृष्टं च इत्यत्र न कोऽपि संशयः ।

**पञ्चमाङ्के** शकुन्तला राज्ञः दुष्यन्तस्य सभायाम् उपस्थिता भवति । परन्तु दुष्यन्तः दुर्वाससः शापवशात् शकुन्तलां न परिचिनोति । तिरस्कृतां शकुन्तलां काचित् अप्सरा अनयत् **षष्ठाङ्के** शकुन्तलया सह कृतस्य तिरस्कारस्य निमित्तं दुष्यन्तः अतीव पश्चात्तापं करोति । अस्मिन्नवसरे इन्द्रसारथिः युद्धार्थं 'भवतां साहाय्यम् अपेक्षितम्' इति इत्थम् इन्द्रस्य सन्देशं श्रावयति । **सप्तमाङ्के** लब्धविजयस्य दुष्यन्तस्य स्वर्गात् प्रत्यागमनावसरे मारीचर्षेः आश्रमे शकुन्तलया पुत्रेण च सह मेलनं भवति इति उल्लिखितम् । मारीचर्षेः आशीर्वादं प्राप्य सकुटुम्बः दुष्यन्तः राजधानीं प्रत्यागच्छति । एवम्प्रकारेण सुखान्तं नाटकं समाप्तिमेति ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) कीदृशं काव्यं दृश्यं भवति ?

(क) गानयोग्यम् (ख) अभिनययोग्यम् (ग) पाठ्योग्यम् (घ) स्मरणयोग्यम्

(२) रूपकस्य कतिप्रकाशः भवति ?

(क) अष्ट (ख) दश (ग) षड् (घ) द्वादश

(३) ''नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्'' इयम् उक्तिः कास्य ?

(क) भारवेः (ख) भासस्य (ग) कालिदासस्य (घ) माघस्य

(४) अभिनयः कतिविधः ?

(क) त्रिविधः (ख) चतुर्विधः (ग) पञ्चविधः (घ) षड्विधः

(५) स्तम्भस्वेदादिभिः निष्पद्यमानः कः अभिनयः भवति ।

(क) आहार्यः (ख) सात्विकः (ग) वाचिका (घ) आङ्गिकः

(६) नाटकस्य एकं विशेषं प्रयोजनम् किम् अस्ति ?

(क) सदाचारशिक्षणम् (ख) शास्त्रबोधनम् (ग) ज्ञानप्राप्तिः (घ) चातुर्यम्

(७) नाट्यवेदः केन सृष्टः ?

(क) विष्णुना (ख) नारदेन (ग) शिवेन (घ) ब्रह्मणा

(८) नाट्ये कस्मात् वेदात् अभिनयः स्वीकृतः ?

(क) सामवेदात् (ख) यजुर्वेदात् (ग) अथर्ववेदात् (घ) ऋग्वेदात्

(९) केन विचारमात्रेण कण्वस्य हृदयं दुःखितं वर्तते ?

(क) शकुन्तलायाः पतिगृहगमनेन (ख) गान्धर्वविवाहेन

(ग) दुर्वाससः शापेन (घ) वृक्षाणां क्रन्दनेन

(१०) कस्मिन् अङ्के शकुन्तलायाः वियोगावस्थायाः वर्णनं वर्तते ?

(क) प्रथमे (ख) द्वितीये (ग) तृतीये (घ) चतुर्थे

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) नाटकं कस्य प्रकारः वर्तते ?

(२) शाकुन्तले कः रसः प्रधानः ?

(३) अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?

(४) करभकस्य सन्देशवृत्तं कस्मिन् अङ्के अस्ति ?

(५) शकुन्तलया पुत्रेण च सह दुष्यन्तस्य मेलनं कस्मिन् स्थले भवति ?

**३. सविस्तरम् उत्तरं लिखत ।**

(१) नाटकस्य उद्देश्यं किम् ?

(२) विश्वनाथोक्ताम् अभिनयलक्षणकारिकां लिखत ।

(३) श्लोकचतुष्टयात् - ''यास्यत्यद्य शकुन्तलेति ...........'' । इत्यस्य श्लोकस्य पूर्तिं कृत्वा अर्थविस्तरं कुरुत ।

**४. टिप्पण्यः समाधेयाः ।**

(१) नाटकानाम् उद्भवः । (२) काव्येषु नाटकं रम्यम् ............ ।

**शिक्षकप्रवृत्तिः**

● शाकुन्तलस्यश्लोकचतुष्टयस्य सार्थं वैशिष्ट्यं बोधयत ।

**छात्रप्रवृत्तिः**

● श्लोकचतुष्टयं कण्ठस्थीकुरुत ।

●

| २ | महाकविभासः - कर्णभारम्, स्वप्नवासवदत्तम् |
|---|---|

# २ महाकविभासः - कर्णभारम्, स्वप्नवासवदत्तम्

**प्रस्तावना**

कविवरभासः संस्कृतदृश्यकाव्येषु सर्वप्राचीनः मन्यते । संस्कृतनाट्यसाहित्ये तस्य अनुपमा कीर्तिः अस्ति । सः संस्कृतनाटकस्य पिता गण्यते । स्वयं महाकविः कालिदासः अपि भासस्य वैशिष्ट्यं मुक्तकण्ठेन स्वीकरोति । मालविकाग्निमित्रस्य प्रस्तावनायां स्पष्टम् उक्तं सूत्रधारेण ''प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवेः कालिदासस्य कृतौ बहुमानः'' इति । अनेन ज्ञायते यत् कालिदासस्य समये भासस्य महती प्रसिद्धिः आसीत् । अस्य कृतयः सर्वसाधारणजनेषु विख्याताः आसन् । कालिदासस्य परवर्तिनः कवयः अपि भासस्य नाटकं प्रशंसितवन्तः । श्रीबाणभट्टेन हर्षचरितस्यादौ भासस्य अतीव प्रशंसा कृता अस्ति । यथा-

**सूत्रधारकृतारम्भैः नाटकैर्बहुभूमिकैः ।**
**सपताकैर्यशो लेभे भासो देवकुलैरिव ॥**

महाकविराजशेखरः लिखति यत् यदा नाटकस्य अग्निपरीक्षा जाता तदा भासस्य नाटकचक्रं प्रज्वलिते वह्नौ प्रक्षिप्तं परन्तु स्वप्नवासवदत्तस्य दाहकः पावकः अपि नाभूत् । तदुक्तं च -

**भासनाटकचक्रेऽपिच्छेकैः क्षिप्ते परीक्षितुम् ।**
**स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥**

भासस्य कृतिषु त्रयोदशकृतय इदानीं प्राप्यन्ते । तत्कृतानि रूपकाणि यथा-

(१) **रामायणाश्रिते** प्रतिमानाटकम्, अभिषेकनाटकञ्च ।
(२) **महाभारताश्रितानि** ऊरुभङ्गम्, दूतघटोत्कचम्, दूतवाक्यम्, कर्णभारम्, मध्यमव्यायोगः, पञ्चरात्रम् च ।
(३) **उदयनकथाश्रिते** प्रतिज्ञायौगन्धरायणम्, स्वप्नवासावदत्तम् ।
(४) **लोककथाश्रिते** अविमारकम्, चारुदत्तम् चेति ।
(५) **कृष्णकथाश्रितम्** बालचरितम्

पुनश्च 'यज्ञफलम्' इति नाम्ना एका कृतिः प्राप्तास्ति । सा अपि भासस्य अस्ति इति मन्यते ।

**महाकविभासस्य स्थितिकालः**

भासस्य समयः निश्चयेन वक्तुं न शक्यते । तस्य स्थितिकालविषये विदुषां मतैक्यं नास्ति । विविधयुक्तिभिः विद्वांसः निर्णेतुं प्रयतन्ते । महाकविभासः चाणक्य-पाणिनिभ्यां प्राचीन इति केषाञ्चन विदुषां मतम् । कालिदासस्य मालविकाग्निमित्रे भासस्य उल्लेखात् कालिदास प्राक्तनः अयम् इति एकेषां विदुषां मतम् अनेन आधारेण पूर्वसीमा ई. पू. ५०० शताब्दी उत्तरसीमा च ईस्वीयाब्दः ३०० शताब्दी इति अनुमीयते ।

**भासस्य रूपकाणां प्रकाशनस्य श्रेयः श्री टी. गणपतिशास्त्रिमहोदयः प्राप्नोति ।**

भासनाटकचक्रस्य प्रचारकः सम्पादकश्च श्री टी. गणपतिशास्त्रिमहोदयः १९१३ ई. वर्षे त्रिवेन्द्रम् संस्कृतमालान्तर्गतं त्रयोदश रूपकाणि प्रकाशितवान् । अद्य येन वयं भासस्य रूपकैः लाभान्विताः स्मः । महाकविभासः चाणक्य-पाणिनिभ्यां प्राचीन इति प्राची केषाञ्चयन विदुषां मतम् ।

**भासस्य नाट्यकला**

महाकविभासस्य नाटकीयकुशलतायाः परिचयः तस्य नाटकानां बाहुल्येन विषयाणां वैविध्येन च प्राप्यते । महाकविभासस्य शैली वैदर्भी अस्ति । तस्य नाटकेषु प्रमुखाः विशेषताः सन्तिः भाषायाः सारल्यम्, अकृत्रिमा शैली, वर्णनेषु यथार्थता, नाटकीयपात्राणां चरित्रचित्रणे व्यक्तित्वप्राधान्यं च । भासस्य नाटकेषु यद्यपि नाट्यशास्त्रस्य नियमानां पूर्णतः पालनं नास्ति तथापि तस्य नाटकानि अत्यन्तं रुचिकराणि रङ्गमञ्चदृष्ट्या च साफल्यम् अधिरोहन्ति । भासस्य नाटकेषु मौलिकता-कल्पनावैचित्र्यञ्च विशेषतया प्राप्यते । रामायणाधारिते प्रतिमानाटक-अभिषेकनाटके रचिते । यथा प्रतिमानाटके भासेन मौलिकतायाः कल्पनाशक्तेः च सम्यक् परिचयः प्रदत्तोऽस्ति । संस्कृते एकाङ्किरूपकस्य रचयिता भास एव । भासस्य नाटकेषु नाटकपञ्चकम् एकाङ्किरूपकेषु--ऊरुभङ्गम्, दूतवाक्यम्, दूतघटोत्कचम्, कर्णभारम्, मध्यमव्यायोगश्च । भासेन नाटकेषु पताकास्थानकम् सुन्दररीत्या प्रयुक्तमस्ति । भासस्य बहुषु नाटकेषु प्रथमश्लोके मुद्रालङ्कारस्य प्रयोगः दृष्यते । सः

मुख्यपात्राणां नामानि मङ्गलाचरणश्लोके दर्शयति । यथा – स्वप्नवासवदत्ते उदयनवासवदत्तापद्मवतीवसन्तकादीनां समावेशः ।

**उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम् ।**
**पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥**

भासः प्रसिद्धः नाटककारः तस्य नाट्यकला नितान्तं रमणीया लोकभोग्या चेति ।

प्रसिद्धांतर 'कर्णभारम्', 'स्वप्नवासवदत्तम्' भासनाटकचक्रे इति रचनाद्वेयात् परिचय पुरस्सरं चितानां श्लोकानाम् अध्ययनं करिष्यामः ।

**कर्णभारम्**

'कर्णभारम्' इति कथानकस्य विषयवस्तु महाभारतकथाश्रितं वर्तते । अस्य रूपकस्य कथानकं सरलं सरसं सुन्दरं मनोरञ्जकं चास्ति । वैदर्भीरीत्या विरचितेऽस्मिन् रूपके कर्णस्य ब्राह्मणवेषधारिणे इन्द्राय कवचकुण्डलप्रदानं वर्ण्यविषयरूपेण वर्तते । अस्मिन् रूपके कर्णस्य उज्ज्वलचरित्रं दानशीलतायाश्च अतिमनोहरं वर्णनं महाकविना भासेन विहितम् ।

रूपकस्य प्रारम्भः सूत्रधारकृतेन मङ्गलाचरणेन भवति । ततः महाराजं कर्णम् निवेदयितुं दूतः समायाति युद्धकाल उपस्थित इति । तावत् स्वयमेव समरभूषासज्जं शल्येन सह आयान्तं कर्णः पश्यति । चिन्ताग्रस्तं कर्णं दृष्ट्वा दूतः शोकान्वितो भवति । कर्णस्य चिन्तायाः कारणमासीत् – परशुरामप्राप्तास्त्रविद्याविस्मरणम् । पुनरपि कर्णः सोत्साहम् अर्जुनं प्रति युद्धार्थं रथं नेतुं प्रेरयति । तदन्तरं सः परशुरामप्रदत्तं शापवृत्तं शल्यराजं श्रावयति। एतादृश्यां परिस्थित्यामपि कर्णः सेनापतेः दायित्वनिर्वहणे कृतसङ्कल्पः भवति । पुनः सः शल्यराजम् अर्जुनसमीपं रथं नेतुं प्रेरयति ।

कर्णशल्यौ यावत् रथारोहणं कुरुतः तावत् ब्राह्मणवेषधारी इन्द्रः वदति – भोः कर्ण ! महत्तरां भिक्षां याचे । याचकस्य वचः श्रुत्वा कर्णः तस्मै गोसहस्रम्, वाजिसहस्रम्, गजवृन्दम्, स्वर्णमुद्राम्, अग्निष्टोमयज्ञफलम्, पृथ्वीम् पुनश्च अन्ते शिरः अपि दातुमुद्युक्तो भवति परन्तु विप्रस्तु कर्णस्याभेद्यं जन्मना सहैव जनितं कुण्डलसहितं कवचं गृहीत्वैव गन्तुमिच्छति । कर्णः अपि छद्मवेशिनः याचकस्य अस्वाभाविकैः असामान्यैः व्यापारैश्च अवगच्छति नूनमयम् कृष्णस्य कश्चित् कार्यसाधको जनः । पुनरपि सः शल्यराजेन वारितेऽपि दानं प्रदाय पुनः तदुद्धरणं न्यायविरूद्धमिति विचार्य कवचकुण्डले इन्द्राय ददाति । विप्रः प्रसन्नः भूत्वा ततः गच्छति । शल्यः कथयति 'भोः कर्ण ! त्वं वञ्चितः', तदुत्तरं यच्छन् कर्णः वदति – 'मया खलु शक्रः वञ्चितः' । अहो ! औदार्यं कर्णस्य ।

अन्ते च इन्द्रः 'विमला' नाम अमोघशक्तिं देवदूतमाध्यमेन प्रेषयति । कर्णः पूर्वं न स्वीकरोति किन्तु ब्राह्मणवचनं मत्वा तां शक्तिं स्वीकरोति ।

पुनश्च दानवीरः सेनापतिः राधेयः शल्यराजम् अर्जुनसमीपं रथं नेतुमादिशति । इत्थं भरतवाक्येन सह एकाङ्किरूपकं सम्पूर्णतां गच्छति ।

**कर्णभारस्य चिताः श्लोकाः**

**नरमृगपतिवर्ष्मालोकनभ्रान्तनारी–**
**नरदनुजसुपर्वव्रातपाताललोकः ।**
**करजकुलिशपालीभिन्नदैत्येन्द्रवक्षाः**
**सुररिपुबलहन्ता श्रीधरोऽस्तु श्रिये वः ॥ १ ॥ (१/१)**

**भावार्थः** – यस्य (विष्णोः) नृसिंहस्वरूपं दृष्ट्वा नरनार्यः, राक्षसाः, देवगणाः, पाताललोकश्च विस्मयम् अनुभूतवन्तः । एवं यः स्वीयैः वज्रसमाननखैः दैत्यराजस्य (हिरण्यकशिपोः) वक्षं विदारितवान्, तादृशः दानवसैन्यपराजितः भगवान् विष्णुः, इन्दिरापतिः युष्माकं कल्याणाय भवतु ।

**अत्युग्रदीप्तिविशदः समरेऽग्रगण्यः**
**शौर्यं च संप्रति सशोकमुपैति धीमान् ।**
**प्राप्ते निदाघसमये घनराशिरुद्धः**
**सूर्यः स्वभावरुचिमानिव भाति कर्णः ॥ २ ॥ (१/४)**

**भावार्थः** - अतीव पराक्रमेण युक्तः युद्धस्थले अग्रेसरः बलवान् कर्णः बुद्धिमान् अस्ति तथापि समयेऽस्मिन् शोकेन तथा परितप्तः जायमानः अस्ति यथा ग्रीष्मे ऋतौ स्वाभाविकैः किरणैः युक्तः सूर्यः मेघमालाभिः आच्छादितः स्यात् ।

**हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः ।**

**उभे बहुमते लोके नास्ति निष्फलता रणे ॥ ३ ॥ (१/१२)**

**भावार्थः** - समराङ्गणे मरणेन स्वर्गप्राप्तिः भवति, एवं च विजयप्राप्तेः अनन्तरं यशो लभते । अतः लोके उभौ अपि अधिकं माननीयौ भवतः । अनेन युद्धकरणे निष्फलता नास्ति एव ।

**इमे हि युद्धेष्वनिवर्तिताशा**

**हयाः सुपर्णेन समानवेगाः ।**

**श्रीमत्सु काम्बोजकुलेषु जाताः**

**रक्षन्तु मां यद्यपि रक्षितव्यम् ॥ ४ ॥ (१/१३)**

**भावार्थः** - युद्धे अभिलाषिणः गरुड इव वेगवन्तः काम्बोजकुलजाताः इमे अश्वाः,येषां रक्षणं मया कर्तव्यम् अस्ति ते मम रक्षणं कुर्वन्तु ।

**यातः कृतार्थगणनामहमद्य लोके**

**राजेन्द्रमौलिमणिरञ्जितपादपद्मः ।**

**विप्रेन्द्रपादरजसा तु पवित्रमौलिः**

**कर्णो भवन्तमहमेष नमस्करोमि ॥ ५ ॥ (१/१६)**

**भावार्थः** - नैकेषां सुराणां महाराजानां मणिमुकुटैः यस्य चरणारविन्दे शोभेते (अर्थात नैकाः राजाः यं नमस्कुर्वन्ति) सः कर्णः अद्य ब्राह्मणश्रेष्ठस्य चरणारविन्दयोः रजसा पावनमस्तकयुतः संसारेऽस्मिन् कृतार्थो भूत्वा भवन्तं नमस्करोति ।

**धर्मोहि यत्नैः पुरुषेण साध्यो**

**भुजङ्गजिह्वाचपला नृपश्रियः ।**

**तस्मात्प्रजापालनमात्रबुद्ध्या**

**हतेषु देहेषु गुणा धरन्ते ॥ ६ ॥ (१/१७)**

**भावार्थ** - केवलं धर्म एव मनुष्येण यत्नपूर्वकं साध्यः राजलक्ष्मीस्तु सर्पजिह्वावत् चञ्चला भवति अतः प्रजापालकम् एव चिन्त्यम्, स्वशरीरस्य पतनान्तरम् अपि गुणाः अस्मान् जीवयन्ति ।

**मदसरितकपोलं षट्पदैः सेव्यमानं**

**गिरिवरनिचयाभं मेघगम्भीरघोषम् ।**

**सितनखदशनानां वारणानामनेकं**

**रिपुसमरविमर्दं वृन्दमेतद् ददामि ॥ ७ ॥ (१/२०)**

**भावार्थः** - येषां कपोलाभ्यां मदपूर्णाः सरितः प्रवहन्ति, येषाञ्च उपरि भ्रमराः गुञ्जन्ति, गिरिसमूहः इव येषां शोभा अस्ति, ये च मेघसमाः गम्भीरघोषयुताः श्वेतनखैः दन्तैश्च युक्ताः युद्धभूम्याम् अनेका शत्रून् विनाशयन्ति तादृशानां गजानां समूहं भवते ददामि ।

**अङ्गैः सहैव जनितं मम देहरक्षा**

**देवासुरैरपि न भेद्यमिदं सहास्त्रैः ।**

**देयं तथापि कवचं सह कुण्डलाभ्यां**

**प्रीत्या मया भगवते रुचितं यदि स्यात् ॥ ८ ॥ (१/२१)**

**भावार्थः** - जन्मनः आरभ्य अङ्गैः सह मम शरीररक्षायै प्राप्तम् एतत्कवचं यच्च देवानां दानवानां च महास्त्रैः अपि अभेद्यम् । यदि भवन्तः एतत् इच्छन्ति तर्हि प्रसन्नतापुरस्सरं कवचेन सह अपि भवभ्यो ददामि ।

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः ।**
**जलं जलस्थानगतं च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठिति ॥ ९ ॥ (१/२२)**

**भावार्थः** - व्यतीते समये अर्जिता विद्या अपि नश्यति,सुदृढमूलाः वृक्षाः अपि पतन्ति, जलमपि जलाशये गच्छता कालेन शुष्यति, किन्तु यज्ञकर्मणि हुतं द्रव्यं, दत्तं च दानं यत् विद्यते तत् तथैव चिरं तिष्ठति । अर्थात् पुण्यस्य नाशः नैव भवति ।

**सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा ।**
**राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः ॥ १० ॥ (१/२५)**

**भावार्थ** - समग्रसंसारः सम्पदा युतः भवतु, सङ्कटानां सर्वथा नाशः भवतु, एवञ्च अस्माकं पृथिव्यां कश्चन एक एव योग्यः राजा राज्ञः गणैः युक्तो भूत्वा प्रशासनं कुर्यात् ।

**स्वप्नवासवदत्तम्**

एतत् षडङ्कं नाटकम् अस्ति । कविवरभासस्य रूपकेषु एतत् नाटकम् उत्तमम् अस्ति । कथानकदृष्ट्या एतत् नाटकं प्रतिज्ञायौगन्धरायणस्य अवशिष्टः भागः अस्ति ।

वत्सराजः उदयनः प्रचीनभारतस्य लोकप्रियः नायकः अस्ति । प्रथमनाटके ''प्रतिज्ञायौगन्धरायणे'' राजा उदयनः शत्रुराजस्य प्रद्योतमहासेनस्य पुत्र्याः वासवदत्तायाः स्नेहजाले पतति । मन्त्रिणः यौगन्धरायणस्य कूटनीत्यनुसारं वासवदत्ता उदयनश्च पलायनं कृत्वा विवाहं कृत्वा च वत्सदेशं प्राप्नुतः ।

वासवदत्तया सह विवाहानन्तरम् उदयनः भोगविलासे मग्नः भवति । राज्यं प्रति ध्यानं न ददाति । एतस्य अवसरस्य लाभं स्वीकृत्य शत्रुराजः आरुणिः वत्सदेशस्य उपरि आक्रमणं करोति । राज्यं पुनः प्राप्तुं यौगन्धराणः रुमण्वान् च योजनां कुरुतः । तौ साहाय्यार्थं राज्ञा दर्शकेन साकं सामाजिकसम्बन्धं स्थापयितुम् इच्छतः । तस्मिन्काले महाराजस्य दर्शकस्य भगिनी पद्मावती आश्रमस्थां स्वमातरं विलोकयितुं तपोवनम् आगच्छति । तदा भटाः सामान्यजनान् मार्गात् दूरीकुर्वन्ति । योजनानुसारम् आवन्तिकावेषधारिणी वासवदत्ता परिव्राजकवेषधारी यौगन्धरायणश्च सैनिकानाम् उत्सारणं दृष्ट्वा दुःखितौ भवतः । पद्मावती तपस्विजनानां कृते किम् आवश्यकमिति काञ्चुकीयमुखेन निमन्त्रयति । सन्तुष्टाः तपस्विनः किमपि न याचन्ते । तस्मिन् समये पुनः काञ्चुकीयः कलशं, वस्त्रं, द्रव्यादिकं दातुं तस्याः सङ्कल्पव्रतस्य घोषणां करोति । एकः आगन्तुकः स्वप्रोषितभर्तृकां भगिनीं कञ्चित्कालं परिपालनम् इच्छति । राजकुमारी पद्मावती तस्य प्रार्थनां स्वीकरोति । अत्रावसरे कश्चन ब्रह्मचारी तपोवनम् आगच्छति । यौगन्धरायणः तं तस्य आगमनस्य प्रयोजनं पृच्छति तदा ब्रह्मचारी कथयति यत्-

एकदा राज्ञि उदयने मृगयायै वनं गते सति अतिदारुणं व्यसनं सञ्जातम् । लावाणकग्रामे अग्निदाहो जातः । तस्मिन् वासावदत्ता दग्धा मृता च इति । तां रक्षितुकामो यौगन्धरायणः अपि तस्मिन् एव अग्नौ पतितः । मृगयातः प्रतिनिवृत्तः राजा उदयनः वृत्तान्तम् इदं ज्ञात्वा विलापम् अकरोत् ।

तस्याः दग्धशेषन्याभरणानि आलिङ्ग्य मोहम् उपगतः । प्राप्तसंज्ञः उदयनः सहसा उत्थाय हा वासवदत्ते ! हा प्रिये ! हा प्रियशिष्ये ! इति किमपि बहु प्रलापं कृतवान्। ततः परं वासावदत्तायाः पद्मावत्याः च परिहासपूर्णः कथासंवादः अस्ति । पद्मावती राज्ञः उदयनस्य गुणसौन्दर्येण प्रभाविता तं परिणेतुम् इच्छति । तदानीं धात्री आगत्य उदयनस्य पद्मावत्या सह विवाहस्य वृत्तान्तं वदति । अन्यप्रयोजनेन इह आगतस्य उदयनस्य अभिजनविज्ञानवयोरूपं दृष्ट्वा महाराजेन स्वयम् एव पद्मावती दत्ता । योगन्धरायणस्य योजनानुसारम् उदयनस्य विवाहः भवति । विदूषकः उदयनस्य मङ्गलविवाहप्रसङ्गे अतिभोजनेन अस्वस्थः भवति । ततः वासवदत्ता पद्मावती च प्रमदवनम् गच्छतः । विदूषकेण सह उदयनः अपि तस्मिन् एव प्रमदवने आयाति । तत्र विदूषकः राजानं पृच्छति यत् - का भवतः प्रिया ? तदानीं वासवदत्ता इदानीं पद्मावती वा ? तदा नृपः विदूषकं किमपि कथयितुं नेच्छति । तेन बहुधा प्रार्थितः तदा राजा कथयति । श्रृणु तावत् -

**''पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः ।**
**वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥'' (४/४)**

राज्ञः मुखात् वचनमिदं श्रुत्वा वासवदत्ता सन्तोषम् अनुभवति । विदूषकः राजानं वासवदत्तायाः मृत्योः विषयं स्मारयति । विवाहानतरम् अपि राजा वासवदत्तां न विस्मरति ।

पत्युः प्रयणयाभावात् पद्मावती शिरोवेदनया दुःखिता भवति । पद्मावत्याः शिरोवेदनायाः वृत्तान्तं ज्ञात्वा उदयनः तस्याः समीपं समुद्रगृहं याति । तत्र ताम् अदृष्ट्वा शय्यायां शेते । वासवदत्तापि पद्मावत्याः शिरोवेदनायाः वृत्तं ज्ञात्वा तत्रागच्छति । सुप्तं राजानं पद्मावतीं मत्वा तत्पार्श्वे उपविशति । तदा राजा उदयनः स्वप्नायते । अनन्तरं वासवदत्ता न कोऽपि मा पश्येदिति शय्याप्रलम्बितस्य राज्ञः उदयनस्य हस्तं शय्यायां स्थापयित्वा निर्गच्छति । तन्मध्ये राज्ञः उदयनस्य अपरः मन्त्री रुमण्वान् शत्रुम् आरुणिं विजित्य अपहृतं राज्यं पुनः प्राप्नोति । तदा महासेनः अभिनन्देनेन सहितम् एकं चित्रं प्रेषयति । पद्मावती वासवदत्तायाः चित्रं दृष्ट्वा आश्चर्यम् अनुभवति । आवन्तिका एव वासवदत्ता अस्ति इति घटस्फोटः भवति । तदा यौगन्धरायणः आगत्य समग्रयोजनायाः रहस्यम् उद्घाटयति । अन्ते राजा तस्य राज्यम् एवं पत्नीम् अधिगच्छति प्रसन्नः भवति च । इत्थं नाटकस्य सुखदः अन्तः आगच्छति ।

**श्लोकाः -**

**उदयानवेन्दुसवर्णावासवदत्तबलौ बलस्य त्वाम् ।**
**पद्मावतीर्णपूर्णा वसन्तकम्रौ भुजौ पाताम् ॥ १ ॥ (१/१)**

**भावार्थः -** उद्गमनूतनचन्द्रसमानवर्णो मदिरावितीर्णबलाऽभावौ कमलाऽवतारपूरितौ सुरभिमनोहरौ बलरामस्य भुजौ त्वां रक्षताम् ।

**पूर्वं त्वयाप्यभिमतं गतमेवमासी -**
**च्छ्लाध्यं गमिष्यसि पुनर्विजयेन भर्तुः ।**
**कालक्रमेण जगतः परिवर्तमाना**
**चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥ २ ॥ (१/४)**

**भावार्थः -** पुरा भवत्याः अपि एवं गमनम् अभिमतम् (अभीष्टम्) पुनः स्वामिनः रिपुहृतराज्यस्य विजयेन प्रशंसा भविष्यति । कालक्रमेण जगतः परिवर्तमाना भाग्यपङ्क्तिः चक्रारपङ्क्तिः इव गच्छति ।

**सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।**
**सुखमन्यद् भवेत् सर्व दुःखं न्यासस्य रक्षणम् ॥ ३ ॥ (१/१०)**

**भावार्थः -** धनं सुखपूर्वकं दातुं शक्यते, प्राणा अनायासं समर्पयितुं शक्यन्ते, तपसः फलं सुखपूर्वकं दातुं शक्यते, अपरं सकलं कष्टं विना दातुं शक्यते परन्तु न्यासस्य (निक्षेपस्य) पालनं रक्षणम् च अत्यन्तं कष्टकरं भवति ।

**पद्मावती बहुमता मम यद्यपि रूपशीलमाधुयैः**
**वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥ ४ ॥ (४/४)**

**भावार्थः -** यद्यपि सौन्दर्यसच्चरित्रप्रीतिविशेषैः पद्मावती मम अतीव प्रिया अस्ति तथापि वासवदत्ता आकृष्टं मम चित्तं न हरति ।

**इयं वाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।**
**कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥ ५ ॥ (४/८)**

**भावार्थः -** एषा नव-विवाहिता युवतिः सत्यवचनं श्रुत्वा दुःखम् अनुभविष्यति यद्यपि एषा वाला पूर्णरूपेण धैर्यशीला अस्ति परन्तु स्त्रीस्वभावः भयग्रस्तः भवति ।

**गुणानां वा विशालानां सत्काराणां च नित्यशः ।**
**कर्तारः सुलभालोके विज्ञातारस्तु दुर्लभाः ॥ ६ ॥ (४/९)**

**भावार्थः -** लाके महतां गुणानां सत्काराणां च कर्तारः प्रायः सुलभाः सन्ति परन्तु विज्ञातारः तु दुर्लभाः एव भवन्ति ।

**शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा**
**न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः ।**
**रागे द्दष्टिविलोभनं जनयितुं शोभा न काचित् कृता**
**प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ॥ ७॥ (५/४)**

**भावार्थः** – शय्या अवनता नास्ति । आच्छादनं पूर्ववत् वर्तते । शीर्षाऽभिधतौषधैः शिरोपधानम् अमलं नास्ति । दृष्टिविलोभनं जनयितुं रागे काचित् शोभा न कृता । जनः रुजा शयनं प्राप्य शीघ्रं शयनं स्वयं न त्यजति ।

**सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः**
**स्मृत्वा पुनर्नृपसुतानिधनं विषादः ।**
**किं नाम देव ! भवता न कृतं यदि स्याद्**
**राज्यं परैरपहृतं कुशलं च दैव्याः ॥ ८॥ (६/५)**

**भावार्थः** – एतत् सम्बन्धिराज्यम् आगत्य अधिकः हर्षः भवति । पुनः राजकुमारीमरणं (वासवदत्तायाः मृत्युः) चिन्तयित्वा प्रचुरः विषादः (दुःखम्) भवति । हे विधे शत्रुभिः अपहृतं राज्यं तथैव वासवदत्तायाः क्षेमं च स्यात् तर्हि भवता किं क्षेमं कृतं स्यात् ।

**षोडशान्तः पुरज्येष्ठा पुण्या नगरदेवता ।**
**मम प्रवासदुःखार्ता माता कुशलिनी ननु ? ॥ ९॥ (६/९)**

**भावार्थः** – षोडषसु अन्तःपुरेषु ज्येष्ठा श्रेष्ठा च पवित्रचरित्रा पुरदेवीस्वरूपा एवं मम देशान्तरवासकृष्टपीडिता मम माता कुशलिनी वा ?

**इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।**
**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥ १०॥ (६/११)**

**भावार्थः** – अस्माकं राजसिंहः भूपश्रेष्ठः उदयनः समुद्रसीमापर्यन्तां विन्ध्याचलकर्णवेष्टनाम् एकच्छत्रचिह्नाम् इमां भूमिं प्रशास्तु ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) मालविकाग्निमित्रस्य प्रस्तावनायां कालिदासेन कस्य नामोल्लेखः सादरं कृतः अस्ति ?
(क) बाणभट्टस्य (ख) राजशेखरस्य (ग) कविपुत्रस्य (घ) भासस्य

(२) भासस्य नाटकचक्रे कति रूपकाणि सन्ति ?
(क) ११ (ख) १३ (ग) १२ (घ) १६

(३) भासस्य रामायणमूलकानि कानि नाटकानि सन्ति ?
(क) अविमारकम्, चारुदत्तम् (ख) कर्णभारम्, मध्यमव्यायोगः
(ग) प्रतिमानाटकम्, अभिषेकनाटकञ्च । (घ) प्रतिज्ञायौगन्धरायणम्, स्वप्नवासावदत्तम् ।

(४) महाकविभासस्य शैली का अस्ति ?
(अ) वैदर्भी (ख) लाटी (ग) गौडी (घ) पाञ्चाली

(५) 'कर्णभारम्' नाटकस्य रचनाकारः कः ?
(क) दण्डी (ख) कालिदासः (ग) भासः (घ) भारविः

(६) कर्णभारम् इत्यस्य का रीतिः वर्तते ?
(क) गौढी (ख) पाञ्चाली (ग) लाटी (घ) वैदर्भी

(७) 'कर्णभारम्' इत्यस्य कति अङ्काः सन्ति ?
(क) चत्वारः (ख) पञ्च (ग) एकः (घ) द्वौ

(८) सम्भ्रान्तः भृत्यः दुर्योधनाज्ञया कं निवेदयति ?
(क) कर्णम् (ख) इन्द्रम् (ग) अर्जुनम् (घ) शैल्यम्

(९) ब्राह्मणवेशधारी कः अस्ति ?
(क) कर्णः (ख) इन्द्रः (ग) शैल्यः (घ) अर्जुनः

(१०) इन्द्रः कर्णं किं याचते ।
(क) धनम् (ख) गजान् (ग) कवचकुण्डलम् (घ) अश्वान्

(११) स्वप्नवासवदत्ते नाटके कति अङ्काः सन्ति ?

(क) ४ (ख) ६ (ग) ८ (घ) १०

(१२) पद्मावती कस्य भगिन्यासीत् ?

(क) दर्शकस्य (ख) यौगन्धरायणस्य (ग) उदयनस्य (घ) परीव्राजकस्य

(१३) कुत्र अग्निदाहो जातः ?

(क) लावाणके (ख) तपोवने (ग) राजद्वारे (घ) वने

(१४) विदूषकः कस्य मित्रम् अस्ति ?

(क) उदयनस्य (ख) यौगन्धराणस्य (ग) दर्शकस्य (घ) बलरामस्य

(१५) आवन्तिकावेषधारिणी का अस्ति ?

(क) पद्मावती (ख) धात्री (ग) वासवदत्ता (घ) तापसी

**२. सविस्तरम् उत्तरं लिखत ।**

(१) 'हतेषु देहेषु गुणाा धरन्ते' पङ्क्तिं स्पष्टां कुर्वन्तु ।

(२) कर्णस्य औदार्यं नाटकानुसारं लिखन्तु ।

(३) यौगन्धरायणः पद्मावतीं किं याचते स्म ?

(४) स्वप्नवासवदत्तस्य शीर्षकस्य सार्थक्यं स्पष्टयत ।

(५) पद्मावत्यै ब्रह्मचारी किं कथयति ?

**३. अधोलिखितसूक्तीनां स्पष्टीकरणं कुरुत ।**

(१) 'हुतं च दत्तं च तथैव तिष्ठति' पङ्क्तिं विवेचयत।

(२) चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ।

(३) दुःखं न्यासस्य रक्षणम् ।

(३) स्त्रीस्वभावस्तु कातरः ।

**४. श्लोकपूर्तिं कुरुत ।**

(१) हतोऽपि लभते .......... ।
........... निष्फलता रणे ॥

(२) धर्मो हि यत्नैः ......... ।
........... देहेषु गुणाः धरन्ते ॥

(३) शिक्षा क्षयं ............. ।
............. दत्तं च तथैव तिष्ठति ॥

(४) सुखमर्थो ......... ।
......... दुःखं न्यासस्य रक्षणम् ॥

(५) गुणानां वा ......... ।
......... विज्ञातारस्तु दर्लभा ॥

**शिक्षकप्रवृत्तिः**

- भासस्य अन्यनाटकानां संक्षेपेण परिचयं कारयत ।

**छात्रप्रवृत्तिः**

- भासस्य कस्यचित् नाट्यखण्डस्य अभिनयं कुरुत ।

●

# ३ नायक - नायिकाभेदाः

संस्कृतभाषायां सुविशालं साहित्यमुपलभ्यते । निखिलं वाङ्मयं (गद्यं पद्यं मिश्रं वा) काव्यम् इति नाम्ना सुप्रसिद्धमेव । इदं काव्यं द्विधा विभक्तमस्ति । श्रव्यं दृश्यं च इति भेदेन श्रव्ये महाकाव्यादीनि दृश्ये च नाटकादीनि भवन्ति।

किं नाम नाटकमिति जिज्ञासायां समाधीयते ।

**''त्रैलोक्यस्याख्यस्य सर्वस्य नाट्यं भावानुकीर्तनम्'' । (नाट्यशास्त्रम्)**
**लोकस्य चरित्रं यत्तु नानावस्थान्तरात्मकम् ।**
**तदङ्गाभिनयोपेतं नाट्यमित्यभिसंज्ञितम् ॥ (नाट्यशास्त्रम्)**

साहित्यशास्त्रे दृश्यकाव्ये हि नाट्यस्य समावेशः क्रियते । तत्र च

**अवस्थानुकृतिर्नाट्यम् (द. रू. ०१/०७)**

इत्थं नाट्यं लोकाह्लादकरं सर्वजनमनोरञ्जनकरं सन्तापहरञ्च भवति । तत्र च नाट्ये वस्तुत्रयं सर्वदा सर्वथा अपेक्षितं भवति । तद्धि वस्तु, नेता, रसः वस्तु नाम नाट्यस्य वृत्तान्तम्, तच्च पुनः काल्पनिकमैतिहासिकञ्च भवति, रसो नाम शृङ्गारादि-अष्टरसानां ह्यनुभूतिः तथा च नेता नाम नायकस्य समावेशः विधीयते तत्र हि नायकस्य प्रेयसी नायिका भवति सहायाश्च उपनायकादयः विरुद्धप्रतिमः खलनायकः । अस्मिन् प्रकरणे वयं नायकनायिकयोः चर्चां विधास्यामः। प्रथमं हि नायकस्य स्वरूपं चेत् नायको नाम नेता, अग्रणीः प्रधानपुरुषः भवति, तस्य लक्षणं पश्यामः ।

यथा सेनायां सेनानायकः तथैव नाट्ये नायकस्य प्राधान्यं भवति । यथा अध्यक्षरहिता सभा, फलरहितः वृक्षः, पुत्ररहितः गृहस्थी, गृहिणीं विना गृहम् वृक्षं विना उद्यानम्, जलेन विना सरः, चन्द्रं विना निशा, तिलकं विना युवत्याः मुखं न शोभते । तथैव नायकं विना नाटकं न शोभते । विना नायकं नाटकस्य कल्पना नोद्भवति ।

**नायकस्य लक्षणम्**

नायकस्य लक्षणं यदि चर्चयामस्तर्हि साहित्यदर्पणे विश्वनाथः आह...

**त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।**
**दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ॥ (सा. द. ३/३०)**

नाटकस्य नायकः त्यागी नाम दानशीलः, कृती नाम कुशलः, कुलीनः नाम उच्चकुलजन्मा, सुश्रीकः नाम सम्पत्सम्पन्नः रूपयौवनोत्साही अर्थात् सौन्दर्यतारुण्योत्साह-सम्पन्नः दक्षः नाम क्षिप्रकारी (शीघ्रकार्यकर्ता) अनुरक्तलोकः नाम अनुरागयुक्तजनः तेजोवैदग्ध्यशीलवान् अर्थात् तेजस्वी, निपुणः, सद्वृत्तः भवति ।

**नायकस्य प्रकाराः**

सामान्य नायकस्य चत्वारः प्रकाराः भवन्ति, तद्यथा -

**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।**
**धीरप्रशान्त इत्येवमुक्तः प्रथमश्चतुर्भेदः ।। (सा. द. ३/३१)**

क्रमशो विलोकयामश्चेत् -

**(१) धीरोदात्तः**

धीरोदात्तः नाम दशरूपकानुसारेण -

**महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।**
**स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥ (द. रु. ०२/०४)**

महासत्त्वः नाम हर्षशोकादिभिरनुद्वेलितचित्तः, अतिगम्भीरो नाम दुर्बोधाभिप्रायः गम्भीरस्वभावः, क्षमावान् नाम क्षमाशीलः अविकत्थनः नाम अनात्मश्लाघी, स्थिरः नाम स्थिरप्रकृतिः, निगूढाहङ्कारो नाम गर्वे सत्यपि विनयेन तत्तिरोधायकः, दृढव्रतः नाम सत्यप्रतिष्ठः एतादृशो धीरोदात्तो भवति ।

साहित्यदर्पणे यथा-

**अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।**
**स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥ (सा. द.-३/३२)**

उत्तररामचरिते श्रीरामस्य कथनम् -

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥**

**(२) धीरोद्धतः**

**दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः ।**
**धीरोद्धतस्त्वहङ्कारी चलश्चण्डो विकत्थनः ॥ (द. रु. ०२/०५)**

दर्पमात्सर्यभूयिष्ठो नाम ईर्ष्यायुक्तः मायाछद्मपरायणः अर्थात् मायावञ्चनादिभिः युक्तः, अहङ्कारी नाम अभिमानशीलः, चलः नाम चञ्चलः, चण्डः नाम भीषणस्वभावः, विकत्थनः नाम आत्मश्लाघी ईदृशः धीरोद्धतः भवति ।

वेणीसंहारे भीमसेनोक्तिः -

**मथ्नामि कौरवशतं समरे न कोपाद्**
**दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।**
**सञ्चूर्णयामि गदया न सुयोधनोरू**
**सन्धिं करोतु भवतां नृपतिः पणेन ॥**

**(३) धीरललितः**

**निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः । (द. रु. ०२/०३)**

निश्चिन्तः नाम चिन्तामुक्तः कलासक्तः नाम नृत्यगीतादिपरायणः, सुखी नाम सुखमानसः, मृदुः अर्थात् कोमलस्वभावः, ईदृशः धीरललितः भवति ।

यथा रत्नावल्यां वत्सराजः

**राज्यं निर्जितशत्रुयोग्यसचिवे न्यस्तः समस्तो भरः,**
**सम्यक्पालनलालिताः प्रशमिताशेषोपसर्गाः प्रजाः ।**
**प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिः**
**कामः काममुपेत्ययं मम पुनर्मन्ये महानुत्सवः ॥**

**(४) धीरप्रशान्तः**

**समान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः । (द. रु. ०२/०४)**

सामान्यगुणयुक्तः अर्थात् नायकस्य त्यागादिगुणैः युक्तः द्विजादिकः नाम ब्राह्मणः धीरप्रशान्तो भवति ।

यथा मालतीमाधवे माधवः

**तत उदयगिरेरिवैक एव**
**स्फुरितगुणद्युतिसुन्दरः कलावान् ।**
**इह जगति महोत्सवस्य हेतु -**
**र्नयनगतामुदियाय बालचन्द्रः ॥**

इत्थं चत्वारोऽपि प्रकाराः स्पष्टीभूताः ततश्च शृङ्गाररसे पूर्वोक्तचतुर्विधनायकः दक्षिणधृष्टानुकूलशठाः इति पुनः चतुर्विधः भवति इत्थं षोडशधा पुनः उत्तममध्यमाधमत्वेन नायकस्य अष्टचत्वारिंशतप्रकाराः भवन्ति ।

**नायकप्रधानभेददर्शकं कोष्ठकम्**

| नायकस्य प्रकारः | नायकस्य उदाहरणम् | उदाहरणम् | कृतिनाम |
|---|---|---|---|
| **धीरोदात्तः** | श्रीरामः, | स्नेह दयां च .... | उत्तररामचरितम् |
| **धीरोद्धतः** | भीमः | मथ्नामि..... | वेणीसंहारम् |
| **धीरललितः** | वत्सराजः | राज्यं निर्जितशत्रु .... | रत्नावली |
| **धीरप्रशान्तः** | माधवः | तत उदयगिरे .... | मालतीमाधवम् |

**नायिकाप्रकाराः**

भारतीयनाट्यशास्त्रे समीक्षकाः नायकस्य प्रेयसीं वा तस्य पत्नीं नायिका इति कथयन्ति । नायकस्य कथाप्रवाहे नायिकायाः अपि अतीवमहत्त्वपूर्णं स्थानं भवति । नायिकारहितं नायकं तथा रुचिकरं न भवति यथा नायिकासहितं नाटकं भवति । इत्थं नायिकायाः उपस्थितिः सर्वतो हि नाट्ये अपेक्षिता ।

**नायिकाप्रकाराः**

नायिकायाः सामान्यतः त्रयः प्रकाराः भवन्ति यथा साहित्यदर्पणे...

**अथ नायिका त्रिविधा स्वाऽन्या साधारणी स्त्रीति ।**

**नायकसामान्यगुणैर्भवति यथा सम्भवैर्युक्ता । (सा. द. ०३/५६)**

क्रमशः इमाः पश्यामः चेत्

(१) **स्वीया नायिका**

**विनयार्जवादियुक्ता गृहकर्मपरा परिव्रता स्वीया ।**

**साऽपि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति ॥ (सा. द. ०३/५७)**

नम्रतासरलतासदाचारयुक्ता, गृहस्थोपयोगिकार्यनिपुणा, पतिव्रता नाम साध्वी स्त्री स्वीया भवति । यथा रामस्य सीता नलस्य दमयन्ती । सा स्वीया नायिका पुनः मुग्धा, मध्या, प्रगल्भा इति त्रिधा विभज्यते ।

(२) **परकीया नायिका**

**परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।**

**परोढा** -

**यात्रादिनिरताऽन्योढा कुलटा गलितत्रपा ॥ (सा. द. ०३/६६)**

परकीयानायिका द्विप्रकारिका कथिता परोढा नाम परपरिणीता द्वितीया कन्या नाम अपरिणीता । तत्र च परोढा (परपरिणीता)उत्सवादितत्परा, परपुरुषगामिनी, निर्लज्जा च भवति ।

**कन्या** -

**कन्या त्वजातोपयमा सलज्जा नवयौवना ।**

(उपयमः = विवाहः न जातः उपयमः यस्याः सा अजातोपयमा इति)

कन्या च तत्र अविवाहिता, लज्जायुक्ता नवयुवती भवति इति । उदा. यथा मालतीमाधवे मालती (परकीया तत्र कन्या)।

(३) **सामान्यनायिका ।**

**धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका । (सा. द. ०३/६७)**

सामान्यनायिकायाः विषये बहुशः वर्णनं साहित्यदर्पणे प्राप्यते परं संक्षेपतोऽत्र पश्यामश्चेत् सामान्यनायिकाया एक एव भेदः तथा च इयं नृत्यगीतादिषु दक्षा वारस्त्री वा भवति । यथा मृच्छकटिके वसन्तसेना ।

इत्थं हि तत्र स्वीयानायिकायाः मुग्धायाः एक भेदः, मध्यायाः पुनः षट्, प्रगल्भायाः षड्भेदाः, आहत्य स्वीयायाः त्रयोदशभेदाः परकीयायाः द्वौ भेदौ साधारणाया च एकः सर्वे आहत्य षोडशभेदाः भवन्ति । ते च पुनः अष्टावस्थासु स्वाधीनभर्तृकादिषु उत्तममध्यमाधमावस्थासु विभज्य चतुरशीत्युत्तरत्रिशतं (३८४) भवन्ति । ते च सविस्तरं साहित्यदर्पणे प्राप्यन्ते ।

**नायिकाप्रधानभेददर्शकं कोष्ठकम्**

| नायिकायाः प्रकाराः | नायिकाः | कृतिनाम |
|---|---|---|
| **स्वीया नायिका** | सीता | उत्तररामचरितम् |
| **परकीया नायिका** | मालती | मालतीमाधवम् |
| **सामान्या नायिका** | वसन्तसेना | मृच्छकटिकम् |

## स्वाध्याय:

**१. प्रदत्तेभ्य: विकल्पेभ्य: योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) नाट्यस्य कस्मिन् काव्ये समावेश: क्रियते ?

(क) चम्पू (ख) गद्यम् (ग) दृश्यम् (घ) चित्रम्

(२) दशरूपकस्य कस्मिन् प्रकाशे नाट्यलक्षणम् अस्ति ?

(क) चतुर्थे (ख) तृतीये (ग) प्रथमे (घ) द्वितीये

(३) मालविकाग्निमित्रम् कस्य कृति: ?

(क) कालिदासस्य (ख) भारवे: (ग) दण्डिन: (घ) माघस्य

(४) नाट्ये सर्वथा किम् अपेक्षितम् ?

(क) आनन्द: (ख) वस्तुत्रयम् (ग) लोक: (घ) दिवस:

(५) साहित्यदर्पणस्य ग्रन्थकर्ता क: ?

(क) विश्वनाथ: (ख) मुरारि: (ग) अश्वघोष: (घ) जयदेव:

(६) नायकस्य प्रथमं कति प्रकारा: ?

(क) त्रय: (ख) चत्वार: (ग) नव (घ) पञ्च

(७) ''मथ्नामि कौरवशतं ..........'' कस्योक्ति: ?

(क) अर्जुनस्य (ख) नकुलस्य (ग) भीमस्य (घ) दौपद्या:

(८) आहत्य नायिकाया: कति प्रकारा: सन्ति ?

(क) ३८४ (ख) ५३२ (ग) ६३० (घ) ७१०

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) साहित्यदर्पणे कस्मिन् परिच्छेदे नायकस्य चर्चा वर्तते ?

(२) सुश्रीक: शब्दस्य कोऽर्थ: ?

(३) नायक: कुत्र अनुरक्तो भवति ?

(४) क: दृढव्रत: भवति ?

(५) द्विजादिक: नायक: कीदृश: भवति ?

(६) परकीया नायिका कतिविधा प्रोक्ता ?

**३. टिप्पण्य: समाधेया: ।**

(१) नायक: (२) धीरललित: (३) धीरप्रशान्त: (४) स्वीया नायिका

**३. सविस्तरम् उत्तरं लिखत**

(१) त्यागी कुलीन: .......... । श्लोकपूर्तिं कृत्त्वा सरलार्थो लेख्य: ।

(२) धीरोद्धतनायकस्य लक्षणोदाहरणपुरस्सरं वर्णनं कुरुत ।

(३) राज्यं निर्जितशत्रु .......... । श्लोकपूर्तिं विधाय भावार्थो लेख्य: ।

(४) नायिकाया: लक्षणं चर्चयत ।

**शिक्षकप्रवृत्ति:**

- भासस्य नाटकेषु विद्यमाननायकानां सभेदं परिचयं कारयत ।

**छात्रप्रवृत्ति:**

- ''पञ्चमहाकाव्येषु'' कीदृशा: नायका: इति विमृश्य लिखत ।

# ४ नारायणभट्टः - वेणीसंहारम्

**वेदविद्येतिहासानाम्**
**आख्यानपरिकल्पनम् ।**
**विनोदकरणं लोके**
**नाट्यमेतद् भविष्यति ॥**

अस्माकं संस्कृतसाहित्ये द्वौ नारायणपण्डितौ स्तः । एकः हितोपदेशग्रन्थकर्ता नारायणपण्डितः द्वितीयः वेणीसंहारनाटकरचनाकारः भट्टनारायणः ।

भट्टनारायणस्य जीवनविषये प्रायः अनुमानमेव प्रमाणं भवति । वेणीसंहारनाट्यकारः भट्टनारायणः मूलतः कान्यकुब्जदेशनिवासी विद्वान् नाट्यकारः आसीत् । किन्तु यदा तत्रत्येन राज्ञा आदिशूरेण पञ्च विद्वांसः निमन्त्रिताः तेषु अयमद्वितीयः ब्राह्मणः पण्डितः आसीत् । बङ्गाले अस्य एव वंशपरम्परा कुलीननाम्ना अधुनाऽपि प्रचलति ।

आदिशूरस्य समयः सप्तमशताब्द्याः उत्तरार्धः अङ्गीक्रियते । तेन अस्य समयोऽपि सप्तमशताब्द्याः उत्तरार्धः स्वीक्रियते । भट्टनारायणस्य वेणीसंहारस्य कथावस्तुविश्लेषणं धनिकेन स्वग्रन्थे कृतम् । अपि च ध्वन्यालोककारः आनन्दवर्धनोऽपि ध्वनिनिरूपणावसरे अस्य एव पद्यमुदाहरति । काव्यालङ्कारकारः आचार्यवामनोऽपि पदभङ्ग-व्याकरणानुकूलतासिद्धये वेणीसंहारस्य ''पतितं वेत्स्यसि क्षितौ'' चतुर्थचरणं स्वीकरोति । अत्र पदभङ्गेन पदद्वयम् प्रथमं वेत्सि द्वितीयपदम् असि, अत्र अनयोः पदयोः पदभङ्गत्वादपि व्याकरणदृष्ट्या शुद्धप्रयोग एव । अनेन अयं व्याकरणविदपि भट्टनारायणः इति सिद्धयति । प्रायः सर्वेऽपि आचार्याः स्वसिद्धान्तप्रस्तुतौ अवश्यमेव भट्टनारायणं स्मरन्ति । सर्वेषां कृते अयं मानार्हः आसीत् ।

बहुभिः प्रमाणैः अयम् वामनानन्दवर्धनाचार्याभ्यां पूर्ववर्ती इति अनुमीयते ।

अस्माकं संस्कृतकाव्यनाट्यजगति महाभारतमाश्रित्य बहुविधानि नाटकानि नाट्याचार्यैः विरचितानि सन्त्येव । तेषु अन्यतमं नारायणभट्टस्य वेणीसंहारनाटकमस्ति । लोकेषु वैदिकीशिक्षासदाचारकर्त्तव्यबोधसम्प्रचाराय नारायणभट्टेन महाभारतमाश्रित्य वेणीसंहारनाटकस्य रचना कृता । अत्र आदौ ''कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिं वेणीसंहारनामनाटकं प्रयोक्तुमुद्यताः स्मः'' इत्यनेन भट्टशब्दः ब्राह्मणवाचकः मृगेन्द्रशब्दः क्षत्रियवाचकः प्रसिद्धः । भट्टनारायणे द्वयोः सङ्गमः प्रतिभाति ।

यथा अरण्ये स्वपराक्रमेण सिंहस्य स्वयमेव मृगेन्द्रता भवति तथैव नवरसरुचिकरेषु नाटकेषु वीररसप्रधाननाटकरचनया अयं स्वीयां कविमृगेन्द्रतां सार्थकतां प्रापयति । अतः -

**तत्रापि कविशार्दूलो भट्टनारायणो महान् ।**

वीररसप्रधानः अयं भट्टनारायणः कविषु महान् शार्दूलः वर्तते ।

भट्टनारायणेन वेणीसंहारस्य मङ्गलपद्ये ''प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम्'' इति लिखितम् । अत्र स्वेष्टदेवस्मरणं कृतमस्ति येन अयं विष्णुभक्तः इति सुप्रसिद्ध एव ।

दण्डिनः मतानुसारमनेन त्रयो ग्रन्थाः विरचिताः, किन्तु एकमेव वेणीसंहारनाटकं मिलति । अधुनाऽपि स्वरचनया शब्ददेहेन भट्टनारायणः राजत एव । अत एव तेन वेणीसंहारस्य अन्तिमे श्लोके अस्य वैशिष्ट्यं निगदितं तद्यथा...

**''काव्यालापसुभाषितव्यसनिनस्ते राजहंसा गता-**
**स्ताः गोष्ठ्यः क्षयमागता गुणलवश्लाघ्या न वाचः सताम् ।**
**सालङ्काररसप्रसन्नमधुराकाराः कवीनां गिरः**
**प्राप्ता नाशमयं तु भूमिवलये जीयात्प्रबन्धो महान्'' ॥ (वे. स. ०६/४७)**

महाकविदण्डिना चोक्तम्

**व्याप्तुं पदत्रयेणापि**
**यः शक्तो भुवनत्रयम् ।**
**तस्य काव्यत्रयव्याप्तौ**
**चित्रं नारायणस्य किम् ? ॥**

अनेन कथनेन भट्टनारायणः भवभूतिसमकालीन एव भवेत् इति अनुमीयते ।

वेणीसंहारनाटकस्य महनीयत्वम् वीररसप्रधानम्, नाट्यशास्त्रनियमानुगुण्येन निबद्धम्, संवादा अतीव प्रभावजनकाः तृतीयाङ्के कवेर्वैशिष्ट्यम्, भीमस्य शौर्यम्, कर्णस्याहङ्कारः, अश्वत्थाम्नो रोषः, दुर्योधनस्य स्वार्थप्रपञ्चो विलसित्वञ्च कविना सुष्ठु प्रतिपादितम् ।

अस्य शैली तु गौडीयेति स्फुटमेव, भाषा अतीवप्रौढा, वीररससंपन्ना च । अन्ते कविः भरतवाक्यरूपेण उब्दोधकं मनोहारि च वचनं प्रोवाच ।

**अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषम्,**
**भवतु भगवन् भक्तिर्द्वैतं विना पुरुषोत्तमे ।**
**दयितभुवनो विद्वद्बन्धुगुणेषु विशेषविद्,**
**सततं सुकृती भूयाद् भूपः प्रसादितमण्डलः**

**वेणीसंहारनाटकम्**

रमणीयार्थप्रतिपादकशब्दात्मकं काव्यं द्विधा विभज्यते । तत्र प्रथमं दृश्यकाव्यम् द्वितीयञ्च श्रव्यकाव्यम् । दृश्यकाव्ये नाटकानां समावेशः भवति । संस्कृतभाषायाः प्रसिद्धनाटकेषु वेणीसंहारनाटकस्य अपि गणना भवति । भट्टनारायणकृतस्य वेणीसंहारनाटकस्य सामान्यपरिचयः अनेन कोष्ठकेन ज्ञायते ।

**वेणीसंहारनाटकम्**

| | |
|---|---|
| रचयिता | भट्टनारायणः |
| मुख्यकार्यम् | द्रौपदीकेशपाशबन्धनम् |
| रूपकप्रकारः | नाटकम् |
| अङ्कसंख्या | षट् |
| नायकः | भीमः |
| नायकप्रकारः | धीरोद्धतः |
| नायिका | द्रौपदी |
| नायिकाप्रकारः | स्वीया मुग्धा |
| प्रतिनायकः | दुर्योधनः |
| मुख्यरसः | वीररसः |
| वृत्तिः | सात्त्वती |
| रीतिः | गौडी, वैदर्भी (गौणा) |

नाटकमिदं विदूषकरहितमस्ति । तथापि संस्कृतजगति स्वरमणीयत्वात् इदं नाटकं सुप्रसिद्धमस्ति ।

**कथासारांशः**

वेणीसंहाराख्यनाटकेऽस्मिन् अङ्कसंख्या षट् अस्ति । तथा च मुख्यकार्यं दुःशासनस्य वक्षस्थरुधिरपानं दुर्योधनस्य ऊरुरुधिरात् द्रौपद्याः केशपाशबन्धनञ्च । क्रमशः षडङ्कानां कथावस्तु पश्यामः येन नाटकं स्पष्टीभवेत् ।

**प्रथमाङ्कः**

प्रथमाङ्के मङ्गलाचरणानन्तरं सूत्रधारः ''स्वस्था भवन्तु कुरुराजसुताः सभृत्याः'' इत्यादि प्रास्ताविकमाचरति, ततश्च कौरवाणां स्वस्तिवचनमाकर्ण्य भीमः क्रुद्धो भूत्वा ''स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः'' ? इति वदन् प्रवेशं करोति । भीमाय कस्यामपि दशायां सन्धिप्रस्तावः न रोचते –''क्रुधा सन्धिं भीमो विघटयति यूयं घटयत'' इति सः ब्रवीति । ''पञ्चभिर्ग्रामैः सन्धिः भविष्यति'' इति सहदेवमुखात् श्रुत्वा, सः सहदेवं कथयति ''भवान् निवेदयतु ज्येष्ठभ्रात्रे युधिष्ठिराय यत् अद्य एकदिनं यावत् अहं तव अनुजः नास्मि न च त्वं मे ज्येष्ठभ्राता,'' अर्थात् अहं तु कौरवान् मारयिष्यामि एव इति तस्य निश्चयः आसीत् । ततः द्रौपदीचतुःशालं प्रविशति ।

ततश्च भयभीतः कञ्चुकी प्रविशति तथा दुर्योधनेन सन्धिप्रस्तावः तिरस्कृतः, भगवतः श्रीकृष्णस्य बन्धनाय यत्नः कृतः । तथा च दुन्दुभिनादः श्रूयते, ततः भीमः द्रौपद्यै कथयति, सहदेवेन सह युद्धभूमिप्रयाणं नाटयति ।

**द्वितीयाङ्कः**

कौरवपक्षकञ्चुकिना अस्याङ्कस्य कथारम्भः भवति । स च भीष्मवधम्, अभिमन्युवधञ्च प्रेक्षकेभ्यः श्रावयति । ततः भानुमत्याः नकुलेन अहिशतमारणदुःस्वप्नस्य वृत्तान्तः आयाति । सा निजपरिचारिकायै एनं वृत्तान्तं श्रावयति । तथा च दुःस्वप्नेन अनिष्टं न जायेत तदर्थं सूर्यं पूजयितुं यतते, परं दुर्योधनः तत्रागत्य तां निवारयति, तथा च कथयति वीराः ईदृशैः स्वप्नैः भयभीताः न भवन्ति ।'' ततः दुर्योधनः सपत्नीकः दारुपर्वतप्रासादं गच्छति ।

पश्चात् कञ्चुकी दुर्योधनाय रथकेतनभङ्गस्य सूचनां ददाति । ततः जयद्रथमाता तथा जयद्रथपत्नी दुःशला च दुर्योधनाय अर्जुनकृतां जयद्रथमारणस्य प्रतिज्ञां निवेदयतः । स च दुर्योधनः तौ आश्वास्य युद्धभूमिं याति ।

**तृतीयाङ्कः**

अस्याङ्कस्य प्रारम्भः राक्षसराक्षसीपात्रद्वयेन भवति । उभौ च द्रोणरुधिरपानव्याजेन द्रोणवधस्य सूचनां दत्तः । ततश्च अश्वत्थाम्नः प्रवेशः भवति । पितृवधं श्रुत्वा सः बहुशोकाकुलो भवति कृपाचार्यश्च तमाश्वासयति । ततश्च कर्णदुर्योधनयोः प्रवेशः भवति । दुर्योधनः सेनापतिपदार्थं कर्णं नियोक्तुमिच्छति परं कृपाचार्यः अश्वत्थामा अस्य पदस्य कृते नियोज्यः इति निवेदयति । ततः कर्णः अश्वत्थाम्नः पुर एव द्रोणस्य अवज्ञां (निन्दां) विदधाति, तत् श्रुत्वा कर्णाश्वत्थाम्नयोः मध्येकलहः भवति । अश्वत्थामा च सूतपुत्र इत्यादिभिः कर्णस्य अवज्ञां करोति कर्णश्च ब्रूते –

**सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।**
**दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ।।** (वेणीसंहारम्–३/३७)

दुर्योधनः कलहशमनं करोति परं द्रोणपुत्रः प्रतिज्ञां करोति यत् ''कर्णवधानन्तरमेव शस्त्रं धारयिष्ये'' इति । पश्चाच्च नेपथ्ये श्रूयते ''सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः'' इति । दुर्योधनः कर्णश्च दुःशासनं त्रातुं प्रयाणं नाटयतः । गृहीतुमिच्छति परं धर्मभीतः सन् न गृहणाति । स च पश्चात्तापं करोति ''आः सर्वथा पक्षपातिनो देवा अपि पाण्डवानाम्'' इत्थं हि अङ्कस्य समाप्तिर्भवति ।

**चतुर्थाङ्कः**

अस्मिन् अङ्के युद्धकारणात् प्रहारमूर्च्छितस्य दुर्योधनस्य सारथिना सह प्रवेशः भवति । सूतः प्रहारमूर्च्छितं दुर्योधनं रथे निवेश्य युद्धभूमेः बहिरानयति । यदा दुर्योधनः पुनः मूर्च्छितः बहिरागच्छति तदा दुःशासनवधमाकर्ण्य अतीव शोकमधिगच्छति। तदवधि एव सुन्दरकः (कर्णानुचरः) तत्रागत्य कर्णपुत्रस्य वृषसेनस्य मरणवार्तां निवेदयति । तथा च कर्णस्य संदेशपत्रं दुर्योधनाय ददाति, संदेशं पठित्वा व्याकुलो भूत्वा दुर्योधनः युद्धभूमिं गन्तुं यतते, परं तदानीमेव गान्धारी

धृतराष्ट्रौ तत्र प्रविशतः । स दुर्योधनस्य ''पार्श्वं पित्रोरपगतघृणः किन्तु वक्ष्यामि गत्वा'' तथापि ''नितरां वन्दनीयाः गुरवः'' इति विचार्य मौनं विदधाति । इत्थमस्य अङ्कस्य समापनं भवति ।

**पञ्चमाङ्कः**

अस्याङ्कस्यारम्भः गान्धारीधृतराष्ट्रदुर्योधनानां संवादेन भवति । दुर्योधनः स्वात्मनः नितरां निन्दां करोति । गान्धारीधृतराष्ट्रौ च तम् आश्वासयतः । गान्धारी च कथयति ''त्वमेक एव आवयोः जीवितकारणभूतः असि, अतः किं ''राज्येन जयेन वा'' सर्वं विहाय सन्धिं करु इति । परं दुर्योधनः सन्धिं नाङ्गीकरोति । तदानीमेव महाकोलाहलः भवति, कर्णमरणस्य च सूचना सर्वत्र व्याप्ता भवति । ततश्च कालक्रमात् भीमार्जुनौ तत्पार्श्वमागच्छतः, त्रयाणां मध्ये वाग्युद्धं च भवति । ततः द्रोणपुत्रः अश्वत्थामा आगत्य तं शोकाकुलं दुर्योधनमाश्वासयन् कथयति ''अयमहमागतः इदानीं सर्वं साधु भविष्यति'' परं दुर्योधनः तमुपालम्भयन् कथयति ''ममाप्यन्तं प्रतीक्षस्व कः कर्णः कः सुयोधनः'' इति । अश्वत्थामा च अवमानात् दुःखितो भूत्वा निर्गच्छति । धृतराष्ट्रश्च एवं दृष्ट्वा कथयति ''अवसानमिदानीं भरतकुलस्य'' इति। ततश्च दुर्योधनः रथं सज्जीकर्तुं सूचयति, गान्धारीधृतराष्ट्रौ च सञ्जयेन सह प्रस्थानं कुरुतः । इत्थमस्य अङ्कस्य समाप्तिर्भवति ।

**षष्ठाङ्कः**

अस्मिन् अङ्के चेटीद्रौपदीभ्यां सह युधिष्ठिरः प्रविशति । स च युधिष्ठिरः दुर्योधनान्वेषणार्थं स्वानुचरान् आज्ञापयति । तथा च कथयति ''पङ्के वा सैकते वा इति, अन्यच्च यत्र कुत्रापि दुर्योधनस्य अन्वेषणं विधीयताम् । ततश्च पाञ्चालकनामा अनुचरः युधिष्ठिरसमीपम् आगत्य 'भीमदुर्योधनयोर्मध्ये युद्धं प्रचलति' इति निवेदयति । तथा चापरम् 'अभिषेकस्य सज्जतां कुरु, शीघ्रं हि वयं विजयं प्राप्स्यामः' इति कृष्णस्य सन्देशं श्रावयति । तदवधि एव दुर्योधनस्य चार्वाकनामा राक्षससखः तत्र मुनिवेशेनागत्य 'दुर्योधनेन भीमस्य मारणं कृतम्' इति वृथा सन्देशं श्रावयति । सन्देशं श्रुत्वा च युधिष्ठिरः द्रौपदी च आत्ममरणस्य कृते इच्छां कुरुतः परं भीषणवेषः भीमः तत्र प्रवेशं करोति । आदौ तु सर्वे अयं दुर्योधनः इत्यालोच्य भयभीताः भवन्ति, द्रौपदी च कातरा भवति, परं भीमः ''नाहं रक्षो न भूतः'' इत्यादि उक्त्वा द्रौपदीं च अवलम्ब्य केशान् बध्नाति । इत्थं च मुख्यकार्यं सिद्धयति, नाट्यं च पूर्णतां याति ।

इत्थं ''वेणीसंहारनाटकम्'' संस्कृतसाहित्ये अलौकिकं महत्त्वं दधाति ।

**वेणीसंहारे मुख्याः श्लोकाः**

**(१) दृष्टः सप्रेम देव्या किमिदमिति भयात् सम्भ्रमाच्चासुरीभिः,**
**शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितेन ।**
**आकृष्यास्त्रं सगर्वैरुपशमितवधूसंभ्रमैर्दैत्यवीरैः,**
**सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु युष्मान् ॥ (वे. स. १/३)**

**प्रसङ्गः** - वेणीसंहारनाटकस्य मङ्गलाचरणस्य तृतीयपद्यमिदमस्ति ।

**अन्वयः** - मयपुरदहने, देव्या सप्रेम दृष्टः, आसुरीभिः किम् इदम् इति भयात् सम्भ्रमात् च शान्तान्तस्तत्त्वसारैः, ऋषिभिः सकरुणम्, विष्णुना सस्मितेन उपशमितवधूसम्भ्रमैः सगर्वैः दैत्यवीरैः अस्त्रम् आकृष्य, देवताभिः सानन्दम्, धूर्जटिः, युष्मान्, पातु ।

**भावार्थः** - अत्र हि मयपुरदहनप्रसङ्गे विविधैः जीवैः विविधदृष्ट्या विलोकितः भगवान् शिवः नाट्यविलोकयितॄणां रक्षणं करोतु इति भावः कविना प्रकटीकृतः । तद्यथा मयपुरदहनप्रसङ्गे पार्वत्या प्रेम्णा दृष्टः, असुरैः उद्वेगसहितं सभयं च दृष्टः, शान्तस्वभावैः ऋषिभिः सकरुणं दृष्टः, विष्णुना पुनः सादरम् आलोकितः साभिमानैः दैत्यैः अस्त्रमुद्यम्य विलोकितः पुनः देवताभिः सहर्षं विलोकितः ईदृशः शङ्करः युष्मान् रक्षतु इति ।

**(२) लाक्षागृहानलविषान्नसभाप्रवेशैः**
**प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।**
**आकृष्यपाण्डववधूपरिधानकेशान्,**
**स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ( वे. सं. १/८ )**

**प्रसङ्गः** - अत्र हि सूत्रधारस्य मङ्गलवचनाद् रोषयुक्तस्य भीमस्य उक्तिः ।

**अन्वयः** - लाक्षागृहानलविषान्नसभाप्रवेशैः, नः, प्राणेषु, वित्तनिचयेषु, च, प्रहृत्य, पाण्डववधूपरिधानकेशान्, आकृष्य, धार्तराष्ट्राः, मयि जीवति स्वस्थाः भवन्ति ।

**भावार्थः** - अत्र हि भीमः सूत्रधारस्य मङ्गलपद्ये ''स्वस्था भवन्तु कुरुराज सुताः सभृत्याः'' इति श्रुत्वा क्रुद्धः सन् मञ्चं प्रविश्य कम्पयति लाक्षागृहाग्निना, विषभोजनेन, सभाप्रवेशादिभिः अस्मान् प्रकर्षेण बाधयित्वा तथा च जीवेषु वित्तादिषु च नैकवारं प्रहारं विधाय, द्रोपद्याः सभामध्ये वस्त्रं केशान् च हृत्वा, मयि भीमे जीवति सति कौरवाः स्वस्थाः भवन्ति ? नाम नैव भविष्यन्ति इति निश्चयः ।

**(३) मथ्नामि कौरवशतं समरे न कोपाद्**
**दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।**
**सञ्चूर्णयामि गदया न सुयोधनोरु**
**सन्धिं करोतु भवतां नृपतिः पणेन ॥ ( वे. स. १/१५ )**

**प्रसङ्गः** - भीमस्य प्रतिज्ञादर्शकः अयं श्लोकः । (भीमस्य उक्तिः)

**अन्वयः** - समरे कोपात् कौरवशतं न मथ्नामि ? दुःशासनस्य उरस्तः रुधिरं न पिबामि ? गदया सुयोधनोरु न सञ्चूर्णयामि ? भवतां नृपतिः पणेन सन्धिंम् करोतु ।

**भावार्थः** - अत्र हि भीमस्य प्रतिज्ञा दरीदृश्यते । भीमः कथयति किमहं युद्धे कोपात् शतसंख्याकान् कौरवान् न मर्दयामि ? किमहं दुःशासनस्य वक्षसः रुधिरं न पिबामि ? किमहं गदया दुर्योधनस्य जङ्घास्थलं न विदारयामि ? भवतां नृपतिः अर्थात् युधिष्ठिरः केनापि मूल्येन सन्धिं विदधातु नाम, परम् अहं कदापि सन्धिप्रस्तावं नाङ्गीकरिष्ये इति भावः ।

**(४) ग्रहाणां चरितं स्वप्नोऽनिमित्तान्युपयाचितम् ।**
**फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥ ( वे. सं. ०२/१५ )**

**प्रसङ्गः** - इयं हि दुःस्वप्नादिकं मिथ्या भवति इति सर्वं वक्तुकामस्य दुर्योधनस्य स्वभार्यां प्रति उक्तिः ।

**अन्वयः** - ग्रहाणाम् चरितम्, स्वप्नः, अनिमित्तानि, उपयाचितम्, च, काकतालीयम्, फलन्ति, तेभ्यः प्राज्ञाः न बिभ्यति ।

**भावार्थः** - अत्र हि दुर्योधनः कथयति सूर्यादिग्रहाणां गतिः स्वप्नदर्शनम्, निरर्थकाः उत्पाताः, सर्वं काकतालीयन्यायेन कदाचित् फलति कदाचित् न फलति एतादृशं भवति, एभ्यः सर्वेभ्यः बुद्धिमन्तो भयभीताः न भवन्तीति भावः ।

**(५) हते भीष्मे हते द्रोणे कर्णे च विनिपातिते ।**
**आशा बलवती राजञ्छल्यो जेष्यति पाण्डवान् ॥ ( वे. स. ०५/२३ )**

**प्रसङ्गः** - इयं हि दुर्योधनं प्रति सञ्जयस्य काव्योक्तिः ।

**अन्वयः** - राजन् ! भीष्मे, हते, द्रोणे, हते, कर्णे च, विनिपातिते (केवलम्), आशा (एव) बलवती, शल्यः, पाण्डवान् जेष्यति ।

**भावार्थः** - अत्र हि सञ्जयः दुर्योधनमालम्ब्य कथयति हे राजन् दुर्योधन ! भीष्मपितामहे दिवङ्गते, द्रोणेऽपि मृत्युं गते, कर्णे च विनाशिते, आशा एव प्रबला यतो हि कर्णसारथिः शल्यः युधिष्ठिरादीन् पाण्डवान् जेष्यति इति अत्रेदं केवलम् आशास्पदम् आश्वासनम् एव ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) लोके विनोदकारणं किम् ?
(क) हास्यम् (ख) नृत्यम् (ग) नाट्यम् (घ) वैभवम्

(२) कान्यकुब्जदेशनिवासी कः ?
(क) भासः (ख) माघः (ग) देवदत्तः (घ) भट्टनारायणः

(३) केन पञ्चविद्वांसः निमन्त्रिताः ?
(क) भोजदेवेन (ख) बृहस्पतिना (ग) आदिशूरेण (घ) भरतेन

(४) अस्य वेणीसंहारस्य कथावस्तुविश्लेषणं केन कृतम् ?
(क) धनञ्जयेन (ख) धनिकेन (ग) रुद्रटेन (घ) जयदेवेन

(५) सर्वेषां कृते कः मानार्हः आसीत् ?
(क) भट्टनारायणः (ख) कालिदासः (ग) देवः (घ) विष्णुः

(६) दण्डिनः मतानुसारं भट्टनारायणस्य कति ग्रन्थाः ?
(क) पञ्च (ख) त्रयः (ग) सप्त (घ) दश

(७) भट्टनारायणस्य शैली का ?
(क) गौडी (ख) लाटी (ग) मागधी (ड) भारती

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) हितोपदेशस्य ग्रन्थकर्ता कः ?
(२) वेणीसंहारस्य आधारभूतः ग्रन्थः कः ?
(३) पञ्चभिर्ग्रामैः किं भविष्यति ?
(४) दुःस्वप्नानिष्टनिवारणाय कस्य देवस्य पूजनं क्रियते ?
(५) जयद्रथस्य पत्नी का ?
(६) द्रोणपुत्रः कः ?
(७) सेनापतिपदार्थं कर्णं नियोक्तुं कः इच्छति स्म ?

**३. टिप्पण्यः समाधेयाः ।**

(१) भट्टनारायणस्य पाण्डित्यम् ।
(२) नाटकेषु वेणीसंहारस्य महनीयता ।
(३) वेणीसंहारस्य कस्याप्यैकस्य अङ्कस्य सारांशं लिखतु ।
(४) भीमस्य प्रतिज्ञा ।

**४. विवेचनात्मकम् उत्तरं लिखत ।**

(१) वेणीसंहारस्य मङ्गलाचरणं लिखत ।
(२) सूतो वा ............ । श्लोकपूर्तिं कृत्वा अर्थं विवेचयत ।
(३) लाक्षागृहानल ............. । श्लोकपूर्तिं कृत्वा भावार्थो लेख्यः ।
(४) ग्रहाणां चरितं ............. । श्लोकपूर्तिं विधाय भावार्थो लेख्यः ।
(५) हते भीष्मे ............ । श्लोकपूर्तिं कृत्वा सरलार्थो लेख्यः ।

**शिक्षकप्रवृत्तिः**

- महाभारत-वेणीसंहारयोः कथावस्तुनः तुलनात्मक चर्चां कुरुत ।

**छात्रप्रवृत्तिः**

- पाठ्यांशे प्रदत्तरलोकान् कण्ठस्थीकुरुत ।

●

# ५ शब्दशक्तय:

का नाम शब्दशक्ति: ? इति समुपजातायां जिज्ञासायां बहूनि शास्त्राणि बहव: आचार्या: शक्ते: स्वरूपं प्रतिपादयामासु: । यथा शाब्दिका: पदपदार्थयो: सम्बन्धान्तरं शक्तिरिति, अपि च अस्मात् पदात् अयमर्थो बोद्धव्य इति ईश्वरसङ्केत: शक्तिरिति कथयन्ति। मीमांसका: सङ्केतग्राह्या शक्तिरिति भाषन्ते । अपि च प्राचीननैय्यायिका: ईश्वरेच्छारूपसङ्केत: शक्तिरिति वदन्ति । कैय्यट: शक्तिशब्दं परिभाषते शब्दार्थयोस्तादात्म्यमेव शक्ति: । इत्थम् अर्थबोधानुकूल: पदपदार्थसम्बन्ध: शक्तिरिति वक्तुं शक्नुम: । वैय्याकरणा: रुढि: योग: योगरुढिश्चेति शक्तित्रयं स्वीकुर्वन्ति । रुढि: घटादिपदेषु, योग: पाचकादिपदेषु, योगरुढिश्च पङ्कजादिपदेषु भवति । प्रभाकरमते अनुभाविका स्मारिका च शक्तिर्द्विविधा वर्तते ।

काव्यशास्त्रे आचार्या: शब्दार्थसहितं काव्यमिति काव्यलक्षणं प्रतिपादयन्ति । शब्दार्थनिरूपणे त्रय: शब्दा: त्रयश्चार्था: सर्वेऽपि एकस्वरेण मन्यन्ते । एतेषां शब्दानाम् अर्थज्ञानाय सम्बन्धकारकं तत्त्वं शक्ति: वृत्तिरिति कथ्यते । काव्यशास्त्रस्य अनेकेषु ग्रन्थेषु अग्निपुराणे, काव्यप्रकाशे, साहित्यदर्पणे, अभिधावृत्तिमातृकायाम्, रसगङ्गाधरादिषु एतस्या: शक्तेर्विवेचनं विद्यते ।

**कति शब्दशक्तय:**

यथा त्रिविधा: शब्दा: त्रिविधा: अर्था: तथैव शक्तिरपि त्रिविधा प्रदर्शिता । यथा –

**वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मत: ।**
**व्यङ्ग्यो व्यञ्जनया ता: स्युस्ति तिस्त्र: शब्दस्य शक्तय:। ( सा. द. – २/३ )**

अत्र अध: क्रमश: तासां विवरणं दीयते,

| क्रम: | शब्द: | अर्थ: | शक्ति: |
|---|---|---|---|
| (१) | वाचक: | वाच्यार्थ: | अभिधा |
| (२) | लाक्षणिक: | लक्ष्यार्थ: | लक्षणा |
| (३) | व्यञ्जक: | व्यङ्ग्यार्थ: | व्यञ्जना |

अभिधया वाच्यार्थ:, लक्षणया लक्ष्यार्थ: व्यञ्जनया च व्यङ्ग्यार्थ: बोध्यते । अत्र क्रमश: तासां विवरणं दीयते –

**अभिधाशक्ति:**

शक्तिषु इयं प्रथमा शक्ति: । अभिधाया: लक्षणं साहित्यदर्पणे विश्वनाथ: प्रदत्तवान्–

**तत्र संङ्केतितार्थस्य बोधनादग्रिमाभिधा ।**

अभिधा यत्र वाच्यार्थो हि मुख्यार्थो भवति मुख्यार्थबोधने च य: सांङ्केतित: शब्दव्यापार: सा शक्ति: कथ्यते ।

साक्षात्संङ्केतित: अर्थ एव मुख्योऽर्थ: न कश्चन अन्य: अर्थ: निर्दिष्ट: । अस्मिन् साक्षात्सङ्केतिते अर्थे शब्दस्य बाधया विना मुख्यव्यापारो भवति सा अभिधा शक्ति: यथा – कमलम्, मुखम्, नेत्रम् लतादय: ।

उत्तमवृद्ध: मध्यमवृद्धमुद्दिश्य गामानय इत्युक्ते गवानयनप्रवृत्तमुपलक्ष्य बाल: सास्नादिमत्पिण्डानयनमिति प्रथमम वगच्छति । पुन: 'गां बधान' 'अश्वमानय' इति भिन्नक्रियाया: पदार्थस्य वा आनयनम्  आहरणम् गोशब्दस्य सास्नादिमान् इति संङ्केतमवधारयति, सा अभिधा शक्ति: । अयं संङ्केत: चतुर्षु स्थलेषु गृह्यते । यथोक्तम् –

सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च ।

एषः सङ्केतः चतुर्षु गृह्यते - (१) जातिः (२) गुणः (३) द्रव्यम् (४) क्रिया ।

(१) जातिः - गोपिण्डादिषु गोत्वादिका ।

(२) गुणः - विशेषाधानहेतुः सिद्धो वस्तुधर्मः ।

(३) द्रव्यम् - एकव्यक्तिवाचिनः हरिहरडित्थडवित्थादयः ।

(४) क्रिया - साध्यरूपाः वस्तुधर्माः पाकादयः ।

अनेन सिद्धं यत् व्यक्तेरुपाधिषु संङ्केतो गृह्यते । महाभाष्यकारः पतञ्जलिः ''चतुष्टयी शब्दानां प्रवृत्तिः'' इति कथयित्वा गौः, शुक्लः, चलः, डित्थः इति व्यक्तेरुपाधिषु सङ्केतं प्रदर्शितवान् ।

आचार्यजयदेवेन निजग्रन्थे चन्द्रालोके षड्विधा अभिधा मता इति लिखितं यथा-

**गौर्नीलः पाचको दण्डी डित्थः कंस इति क्रमात् ।**

इत्थमभिधायाः स्वरूपं सामान्येन काव्यशास्त्रे प्रतिपादितम् ।

**अभिधा शब्दशक्तिः**

| **सङ्केतस्थानम्** | **उदाहरणम्** | **तात्पर्यम्** |
|---|---|---|
| जातिः | गौः | गोत्वम् |
| गुणः | नीलः | नीलत्वम् |
| क्रिया | पाचकः | पाकक्रिया |
| वस्तुयोगः | दण्डी | दण्डरूपवस्तुयोगः |
| संज्ञा | डित्थः | डित्थत्वसंज्ञा |
| निर्देशः | कंसः | कङ्कारस-कारसवर्णनिर्देशः । |

**लक्षणाशक्तिः**

वाच्यार्थबोधिका अभिधाशक्तिः, किन्तु यत्र मुख्यार्थस्य वाक्ये अन्यैः पदैः सह अन्वयः न भवति एवं च लक्ष्यार्थस्य मुख्यार्थेन सह कश्चन सम्बन्धः भवति, तेन सह तत्र रूढिवशात् प्रयोजनवशाद्वा अर्थावबोधो जायते सा लक्षणाशक्तिरित्यभि-धीयते । तस्य लक्षणं प्रस्तौति काव्यप्रकाशकारः मम्मटः-

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया ॥ ( का. प्र. - २/९ )**

लक्षणावृत्तेः कृते त्रीणि कारणानि अपेक्षन्ते -

(१) मुख्यार्थस्य बाधः (२) लक्ष्यार्थस्य मुख्यार्थेन सह सम्बन्धः (३) रुढिः प्रयोजनं वा ।

**(१) मुख्यार्थबाधः** - मुख्यार्थस्य बाधः अन्वयानुपपत्तिद्वारा अथवा तात्पर्यानुपपत्तिद्वारा भवति । उदा. - गङ्गायां घोषः इत्यत्र गङ्गायाः अर्थः जलप्रवाहः, घोषस्य कुटीरम् इति । जलप्रवाहे कुटीरस्य अशक्यत्वात् अन्वयः अनुपपन्नो भवति तदा अन्वयानुपपत्तिद्वारा मुख्यार्थबाधः भवति, सामीप्य सम्बन्धेन च तटरूपार्थं स्वीकारात् गङ्गातटे घोषः इत्यर्थस्य बोधो जायते । अत्र शैत्यपावनत्वातिशयः प्रयोजनम् ।

परन्तु नागेशभट्टेन 'तात्पर्यानुपपत्तिः लक्षणायाः बीजमिति' कथितम् ।

अपि च –

**काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि चोदितः ।**
**उपघातपरे वाक्ये न श्वादिभ्यो रक्षति ॥**

काकेभ्यो दधि सर्पिः वा रक्ष्यतामित्यत्र काकेभ्य इति पदस्य तात्पर्यानुपपत्तिद्वारा दध्युपघातकेभ्यः इत्यर्थे लक्षणा भवति । अतः लक्षणायाः बीजं तात्पर्यानुपपत्तिरपि भवति ।

**(२) लक्ष्यार्थस्य मुख्यार्थेन सह सम्बन्धः** – यथा कर्मणि कुशलः इत्यत्र कुशान् लाति आदत्ते इति कुशलः इति व्युत्पत्तिमनुसृत्य 'कुशलः' इत्यस्य बाधो भूत्वा विवेचकत्वसम्बन्धेन अन्यार्थः प्रतीयते । तथैव 'गङ्गायां घोषः' इत्यत्रापि सामीप्यसम्बन्धः अत एव 'तद्योगे' कथितम् मुख्यार्थेन सह लक्ष्यार्थस्य सम्बन्धः ।

**(३) रूढिः प्रयोजनं वा** – लक्षणा रूढितो प्रयोजनात् वा भवति यथा रुढिवशात् कुशलः इति पदे कुशलः दक्षार्थे रूढः भवति 'गङ्गायां घोषः' इत्यत्र गङ्गातटे घोषः इति शैत्यपावनत्वादिरूपप्रयोजनात् प्रवाहः इति पदस्य 'तटम्' इत्यर्थे बोधः भवति ।

इत्थं मुख्यार्थबाधे विवेचकत्वादौ सामीप्य सम्बन्धेन, रूढितः प्रयोजनात् वा मुख्येन अमुख्योऽर्थः लक्ष्यते स आरोपितः व्यापारः लक्षणा । उक्तं च विश्वनाथेन –

**मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।**
**रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता ॥ ( सा. द. – २/५ )**

**लक्षणायाः भेदाः ( लक्षणा तेन षड्विधा )**

आदौ शुद्धा गौणी च इति लक्षणायाः भेदद्वयम् । तत्र शुद्धा लक्षणायाः द्वौ भेदौ, मुख्यतः उपादानलक्षणा लक्षणलक्षणा चेति । पुनश्च शुद्धायाः गौण्याश्च भेदद्वयम् – सारोपा साध्यवसाना च । इत्थमाहत्य चत्वारो भेदाः भवन्ति – (१) शुद्धा सारोपा, (२) शुद्धा साध्यवसाना, (३) गौणी सारोपा, (४) गौणी साध्यवसाना ।

**लक्षणाशब्दशक्तिः**
↓
**शुद्धा** | **गौणी**

**शुद्धा** ↓
- **(१) उपादानलक्षणा** (कुन्ताः प्रविशन्ति)
- **(२) लक्षणलक्षणा** (गङ्गायां घोषः)
- **(३) सारोपा** (गौर्वाहीकः)
- **(४) साध्यवसाना** (गौरयम्)

**गौणी** ↓
- **(१) सारोपा** (आयुर्घृतम्)
- **(२) साध्यवसाना** आयुरेवेदम्)

**शुद्धा**

शुद्धा लक्षणा द्विधा । तद्विषये मम्मटः वक्ति –

**स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ ( का. प्र. – २/१० )**

**(१) उपादानलक्षणा :** यत्र मुख्यार्थग्रहणपुरस्सरं लक्ष्यार्थस्य बोधः भवति तत्र उपादानलक्षणा भवति । उदाहरणं यथा – कुन्ताः प्रविशन्ति । अत्र कुन्तधारिणः पुरुषाः प्रविशन्ति इति उपादानलक्षणया अवगम्यते ।

**(२) लक्षणलक्षणा :** यत्र मुख्यार्थत्यागपुरस्सरं लक्ष्यार्थस्य बोधः भवति तत्र लक्षणलक्षणा भवति । तदेवोक्तम् – 'परार्थं स्वसमर्पणम्' इति । यथा 'गङ्गायां घोषः' इत्यत्र घोषशब्दः आधेयत्वरूपान्वयं प्रतिपादयितुं जल-प्रवाहरूपमुख्यार्थं विहाय सामीप्यसम्बन्धात् 'तटरूपान्यार्थबोधकः' भवति अतः लक्षणलक्षणा ।

(३) **सारोपा :** अत्र आरोप्यमाणः विषयी उपमानं तथा च आरोपविषयः उपमेयं शब्दतः उक्तौ स्याताम्, तत्र सारोपा भवति । लक्षणेयं रूपकालङ्कारस्य बीजम् ।

शुद्धा सारोपायाः - गौर्वाहीकः इत्युदाहरणम् ।

गौणीसारोपायाः - आयुर्घृतम् इत्युदाहरणम् ।

(४) **साध्यवसाना :** यत्र विषयीद्वारा आरोप्यमाणोपमानेन अन्यस्य निगरणं भवति तत्र साध्यवसाना लक्षणा भवति । लक्षणेयम् अतिशयोक्त्यलङ्कारस्य बीजम्

**उदा. :** शुद्धासाध्यवसानायाः - गौरयम् ।

गौण्याः साध्यवसानायाः - आयुरेवेदम् ।

इत्थं काव्यप्रकाशे लक्षणायाः षड्भेदान् प्रस्तौति मम्मटः ।

**भेदाविमौ न सादृश्यात् सम्बन्धान्तरतस्तथा ।**
**गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा ॥ (का. प्र. - २/१२)**

आलङ्कारिकः विश्वनाथः आहत्य लक्षणायाः भेद-प्रभेदसहितान् अशीतिप्रकारान् लिखति । एवमशीतिप्रकारा लक्षणा ।

**व्यञ्जनाशक्तिः**

व्यनक्ति अर्थान् सा व्यञ्जना । इयं व्यञ्जनाशक्तिः सर्वश्रेष्ठा उत्तमकाव्यस्य कृते अत्यावश्यकी च भवति । या श्रवणेनैव विशिष्टम् अर्थं प्रकटयति, स्फोटयति सा व्यञ्जना । आनन्दवर्धनः ध्वनिशब्देन व्यञ्जनामेव सर्वप्रथमं स्वीकरोति । अभिधया लक्षणया वा योऽर्थः प्रकटितो भवति ततोऽपि विशेषम् अर्थं प्रतिपादयित्री शक्तिः व्यञ्जना । व्यङ्ग्यार्थप्रधानं काव्यम् उत्तमं काव्यमिति काव्यशास्त्रज्ञाः स्वीकुर्वन्ति, यथोक्तम् **'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः'**, 'का नाम व्यञ्जना ?' इति जातायां जिज्ञासायां विश्वनाथः साहित्यदर्पणे व्याख्यायति -

**विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥ (सा. द. - २/१२-१३)**

शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति नयेनाभिधा-लक्षणा-तात्पर्याख्यासु तिसृषु वृत्तिषु स्वस्वमर्थं बोधयित्वोपक्षीणासु सत्सु यया अन्योऽर्थो बोध्यते सा शब्दस्यार्थप्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जन ध्वनन-गमन-प्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ।

व्यञ्जनावृत्या प्रतिपाद्योऽर्थः व्यङ्ग्यार्थः कथ्यते । एष व्यङ्ग्यार्थः वाच्यार्थवत् नियतो न भवति, परन्तु वक्तुः प्रकरणादीनां भिन्नतया अनियतो भवति । यथा-गतोऽस्तमर्कः अत्रोदाहरणे वाच्यार्थेन अभिधायाः सूर्यास्तः जातः इत्यर्थः, परन्तु प्रकरणादिभेदेन सेनापतेः कथने आक्रमणसमयः, मुनेः कथने सन्ध्यापूजाकालः, प्रेयस्याः कथने - प्रियमेलनसमयः, कार्यकर्तॄणां कथने - कार्यसमापनकालः इत्यादयः बहवः अर्थाः व्यञ्जना शक्त्या एव ज्ञायन्ते । उदाहरणरूपेण आनन्दवर्धनस्य ध्वन्यालोकस्य श्लोकः -

**भ्रम धार्मिक विस्रब्ध स शुनकोऽद्य मारितस्तेन ।**
**गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥**

अत्र विधिरूपे वाच्यार्थे निषेधरूपः व्यङ्ग्यो भवति ।

मञ्जूषाकारः नागेशः व्यञ्जनालक्षणं ददाति - मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्य-ज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जनेति ।

**व्यञ्जनायाः भेदाः**

प्रधानतया व्यञ्जनायाः द्वौ भेदौ भवतः - शाब्दीव्यञ्जना आर्थीव्यञ्जना च । तत्र च शाब्द्याः व्यञ्जनायाः द्वौ भेदौ स्तः अभिधामूला व्यञ्जना, लक्षणामूला व्यञ्जना च ।

**व्यञ्जना शक्तिः**

**शाब्दी व्यञ्जना** — **आर्थीव्यञ्जना**

**शाब्दी व्यञ्जना**
- **अभिधामूला व्यञ्जना** (सशङ्खचक्रो हरिः) (स्थाणुं वन्दे)
- **लक्षणामूला व्यञ्जना** गङ्गायां घोषः
  - **अव्यङ्ग्या** वाच्यार्थव्यञ्जना
  - **गूढव्यङ्ग्या** लक्ष्यार्थव्यञ्जना
  - **अगूढव्यङ्ग्या** व्यङ्ग्यार्थव्यञ्जना

**आर्थीव्यञ्जना**
- **वाच्यार्थव्यञ्जना** (कालो मधु...)
- **लक्ष्यार्थव्यञ्जना** (निःशेषच्युतचन्दनम्...)
- **व्यङ्ग्यार्थव्यञ्जना** (पश्य निश्चल...)

अत्र क्रमशः संक्षेपेण विवरणं प्रस्तूयते -

**अभिधामूला शाब्दीव्यञ्जना**

**अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।**
**एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ।। ( सा. द. - २/१४ )**

अनेकार्थानाम् शब्दानामेकस्मिन्नर्थे नियामकैः संयोगादिकैः नियन्त्रिते सति एकस्मिन् अर्थे अन्यार्थप्रतीतिकारिका या व्यञ्जना अभिधया आश्रिता भवति सा अभिधामूला व्यञ्जना ।

संयोगादिषु १४ तत्त्वानि समाविश्यन्ते । तदर्थमुच्यते काव्यप्रकाशकारेण मम्मटेन वाक्यपदीयवचनमुद्धरता-

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥**

| क्र.सं. | तत्वम् | उदाहरणम् | नियमितार्थः |
|---|---|---|---|
| १. | संयोगः | सशङ्खचक्रो हरिः | विष्णुः |
| २. | विप्रयोगः | अशङ्खचक्रो हरिः | विष्णुः |
| ३. | साहचर्यम् | भीमार्जुनौ | पाण्डवपुत्रौ |
| ४. | विरोधिता | कर्णार्जुनौ | सूतपुत्रकर्णः |
| ५. | अर्थः | स्थाणुं वन्दे | शिवः |
| ६. | प्रकरणम् | सर्वं जानाति देवः | भवान् राजा |
| ७. | लिङ्गम् | कुपितो मकरध्वजः | कामदेवः |
| ८. | शब्दस्यान्यस्य सन्निधिः | देवः पुरारिः | शिवः |
| ९. | सामर्थ्यम् | मधुना मत्तः पिकः | वसन्तर्तुः |
| १०. | औचिती | पातु वो दयितामुखम् | साम्मुख्यम् |
| ११. | देशः | विभाति गगने चन्द्रः | चन्द्रमाः |
| १२. | कालः | निशि चित्रभानुः | अग्निः |
| १३. | व्यक्तिः | भाति रथाङ्गम् | चक्रम् |
| १४. | स्वरः | वेदेषु | उदात्तादिः |

अत्र उदाहरणेषु संयोगाद्यैः अनेकार्थकाः शब्दाः एकस्मिन् अर्थे नियमिताः प्रदर्शिताः । एषा अभिधामूला व्यञ्जना अभिधीयते ।

**लक्षणामूला शाब्दीव्यञ्जना**

**लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।**
**यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया ।। ( सा. द. - २/१५ )**

यस्य प्रयोजनं ज्ञातुं प्रयोजनवती लक्षणा उपयुज्यते तत् प्रयोजनं यया वृत्या बोध्यते सा लक्षणामूला व्यञ्जना । तद्यथा - 'गङ्गायां घोषः' इत्यत्र मुख्यार्थं प्रवहमानधारां बाधित्वा लक्षणया तटमित्यर्थो बोध्यते । तेन च तटरूपेऽर्थे गृहीते अनया व्यञ्जनया शैत्यपावनत्वादिरूपधर्माणां प्रतीतिः ।

अत्र गङ्गा शब्देन त्रयः अर्थाः द्रष्टुं शक्यन्ते -

| | | | |
|---|---|---|---|
| (१) | अभिधा | गङ्गा | प्रवहमानधारा |
| (२) | लक्षणा | गङ्गा | तटम् |
| (३) | व्यञ्जना | गङ्गा | शैत्यपावनत्वम् |

मम्मटोऽपि कथयति - प्रयोजनप्रतीतेः कृते लक्षणा आवश्यकी परन्तु केवलशब्दगम्यप्रयोजनविषये लक्षणामूला व्यञ्जना अपेक्षते ।

यथा-

**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।**
**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया । ( सा. द. - २/१६ )**

लक्षणामूला व्यञ्जना त्रिधा भवति - अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्या चेति ।

**आर्थी व्यञ्जना**

**वक्तृबौद्धव्यवाक्यानामन्यसंनिधिवाच्ययोः ।**
**प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ॥**

वक्तुः, बौद्धव्यस्य, वाक्यस्य, अन्यसन्निधेः वाच्यार्थस्य, प्रस्तावस्य, देशस्य, कालस्य, काकोः चेष्टायाश्च वैशिष्ट्येन या शब्दशक्तिः अन्यमर्थं बोधयति सहृदयानां कृते सः अन्यार्थप्रतीतिहेतुः अर्थव्यापारः एव आर्थीव्यञ्जना । एवं एतैः दशवैशिष्ट्यैः आर्थीव्यञ्जना गम्यते ।

वाच्यार्थव्यञ्जना लक्ष्यार्थव्यञ्जना व्यङ्ग्यार्थव्यञ्जना चेति प्रकारत्रयम् आर्थीव्यञ्जनायाः । वक्तृवाक्यप्रस्वावदेश-कालवैशिष्ट्यम् आर्थीव्यञ्जनाया उदाहरणं स्वकीयमेव श्लोकमुपन्यस्तवान् विश्वनाथः ।

अत्र वाच्यार्थव्यञ्जना संलक्ष्यते -

**कालो मधुः कुपित एष च पुष्पधन्वा**
**धीरा वहन्ति रतिखेदहराः समीराः ।**
**केलीवनीयमपि वञ्जुलकुञ्जमञ्जु**
**दूरे पतिः कथय किं करणीयमद्य ॥**

अत्र 'हे सखि ! शीघ्रं प्रच्छन्नकामुकमत्र प्रेषय' इति आर्थी व्यञ्जना सूच्यते तथैव **'निःशेषच्युतचन्दनस्तनतटम्'** इति

उदाहरणे बौद्धव्यवैशिष्ट्यात् आर्थीव्यञ्जना । अत्र तदन्तिकमेव रन्तुं गताऽसि इति विपरीतलक्षणायाः लक्ष्यम् । तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्य दूतीवैशिष्ट्याद् बोध्यते । लक्ष्यार्थव्यञ्जना अस्मिन्नुदाहरणे वर्तते ।

व्यङ्ग्यार्थव्यञ्जनाया उदाहरणम् यथा –

**पश्य निश्चल निष्पन्दा बिसिनीपत्रे राजते बलाका ।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ।**

अत्र बलाकायाः निष्पन्दत्वेन विश्वस्तत्वम्, तेनास्य देशस्य विजनत्वम् अतः सङ्केतस्थानमेतदिति कयापि संनिहितं प्रच्छन्नकामुकं प्रत्युच्यते । अत्रैव स्थाननिर्जनत्वरूपं व्यङ्ग्यार्थव्यञ्जनं प्रकटयति ।

इत्थं वाच्यलक्ष्यव्यङ्ग्यभेदभिन्नानामर्थानां त्रैविध्यात् आर्थीव्यञ्जना त्रिप्रकारवती भवति ।

आर्थीव्यञ्जनायां शब्दस्य सहकारित्वं भवति, यतः शब्दप्रमाणगम्योऽर्थः अर्थान्तरेण अभिव्यनक्ति । तेनैव प्रकारेण आर्थीव्यञ्जानायामपि शब्दः सहकारी भवति । इत्थं व्यञ्जनायाः स्वरूपं साहित्यशास्त्रविद्वांसः निरूपयन्ति ।

## स्वाध्याय

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) शब्दशक्तयः कति ?
(क) द्वे (ख) तिस्रः (ग) चतस्रः (घ) पञ्च

(२) अभिधया कस्य अर्थस्य ग्रहणं भवति ?
(क) व्यङ्ग्यस्य (ख) लक्ष्यस्य (ग) वाच्यस्य (घ) तात्पर्यार्थस्य

(३) अभिधाशक्तेः ग्रहणं कुत्र न भवति ?
(क) जातौ (ख) व्यक्तौ (ग) क्रियायाम् (घ) द्रव्ये

(४) लक्षणा कतिविधा ?
(क) चतुर्विधा (ख) षड्विधा (ग) अष्टविधा (घ) दशविधा

(५) कः तात्पर्यानुपपत्तिं लक्षणायाः बीजं मन्यते ?
(क) मम्मटः (ख) विश्वनाथः (ग) नागेशः (घ) भरतमुनिः

(६) 'कुन्ताः प्रविशन्ति' इत्युदाहरणं कस्य ?
(क) शुद्धा साध्यवसानायाः (ख) उपादानलक्षणायाः
(ग) शुद्धासारोपायाः (घ) लक्षणलक्षणायाः

(७) कस्य मते लक्षणायाः अशीतिभेदाः ?
(क) विश्वनाथस्य (ख) जगन्नाथस्य (ग) मम्मटस्य (घ) अभिनवगुप्तस्य

(८) आचार्यः आनन्दवर्धनः व्यङ्ग्यार्थं केन शब्देन ब्रूते ?
(क) स्फोटः (ख) रसः (ग) ध्वनिः (घ) औचित्यम्

**२. 'क' विभागं 'ख' विभागेन सह संयोजयत ।**

| 'क' | 'ख' |
|---|---|
| (१) स्थाणुं वन्दे | (१) सारोपा शुद्धा लक्षणा |
| (२) आयुर्घृतम् | (२) संयोगः |
| (३) गौर्वाहीकः | (३) अर्थः |
| (४) सशङ्खचक्रो हरिः | (४) प्रकरणम् |
| (५) भीमार्जुनौ | (५) सारोपा गौणी लक्षणा |
| | (६) साहचर्यम् |

**३. एकेन वाक्येन उत्तरं लिखत ।**

(१) तिसृषु शक्तिषु प्रथमा का शक्तिः ?

(२) सङ्केतः कुत्र गृह्यते ?

(३) 'कर्मणि कुशलः' इत्यत्र कस्मिन् शब्दे लक्षणा ग्राह्या ?

(४) 'गङ्गायां घोषः' इत्यत्र का लक्षणा ?

(५) शुद्धालक्षणायाः कौ द्वौ भेदौ स्तः ?

(६) कः लक्षणां षड्विधां मन्यते ?

(७) व्यञ्जनाशक्तेः मुख्यतया कति भेदाः ?

**४. टिप्पण्यः समाधेयाः ।**

(१) अभिधाशक्तिः ।

(२) लक्षणायाः भेदाः ।

**५. सविस्तरम् उत्तरं लिखत ।**

(१) शब्दशक्तिविचारः ।

(२) लक्षणायाः स्वरूपम् ।

(३) अभिधामूला शाब्दीव्यञ्जना ।

(४) व्यञ्जनावृत्तिः ।

**६. विवेचनात्मकम् उत्तरं लिखत ।**

(१) सङ्केतग्रहः ।

(२) उपादानलक्षणा ।

(३) लक्षणामूला आर्थीव्यञ्जना ।

(४) व्यञ्जनायाः स्वरूपम् ।

**शिक्षकप्रवृत्तिः**

अधस्तनकोष्ठकाधारेण प्रस्तुतपाठार्थं पुनरपि अनुशीलयेत् ।

**छात्रप्रवृत्तिः**

व्यावहारिकवार्तालापेऽपि लक्षणावाक्यानि कानि इति अवधारयेयुः ।

| शक्तिः | पर्यायाः | शब्दः | अर्थः | पर्यायाः |
|---|---|---|---|---|
| अभिधा | शक्तिः | वाचक | वाच्यः | मुख्यः सङ्केतितः शक्यः |
| लक्षणा | भक्ति उपचारः | लक्षकः | लक्ष्यः | भाक्तः |
| व्यञ्जना | व्यक्तिः | व्यञ्जकः | व्यङ्ग्यः | रसादिः |

# ६ काव्यगुणाः

काव्येषु गुणानां किं स्थानमिति विषये बहूक्तं तथापि काव्यप्रकाशकारः यदुक्तवान् प्रायः तदेव साम्प्रतं सर्वे स्वीकुर्वन्ति । तच्च –

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥ इति ।**

यथा शौर्यादयो गुणाः आत्मनः सन्ति, शरीरस्य न सन्ति तथैव माधुर्यादयो गुणा रसस्य एव सन्ति न तु वर्णानाम् इति भावः ।

गुणानां संख्याविषये नास्ति मतैक्यम् । भरतमुनिना दशगुणाः स्वीकृताः । अग्निपुराणे एकोनविंशतिर्गुणाः वामनेन च विंशतिगुणाः स्वीकृताः ।

**माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश ।**

गुणभेदेन तद्विभागमाह ।

**'ओजःप्रसादमाधुर्यगुणत्रितयभेदतः' ।**

वामनमतेन काव्यगुणाः दश सन्ति । यथा –

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।**
**अर्थव्यक्तिरुदारत्वम् ओजःकान्तिसमाधयः ॥**

ओजः, प्रसादः, श्लेषः, समता, समाधिः, माधुर्यम्, सुकुमारता, उदारता, अर्थव्यक्तिः, कान्तिः इमे दशगुणाः प्रोक्ताः । एतेषु गुणेषु ओजः, श्लेषः, समता, सुकुमारता इमे चत्वारः शब्दगुणाः सन्ति । प्रसादः, अर्थव्यक्तिः, उदारता, कान्तिः, समाधिः इमे पञ्च अर्थगुणाः सन्ति, माधुर्यगुणः शब्दार्थसम्बद्धः इति ।

भामहमम्मटाद्यालङ्कारिकैः त्रयः एव गुणाः स्वीकृताः तेषां कथनमिदमेवास्ति यत् दोषाणाम् अभावः एव तत्र दृश्यते, त्रयः एव गुणाः शुद्धाः इति सम्यक् विचिन्त्य तैः अन्यगुणानाम् एतेषु गुणेषु एव अन्तर्भावः कल्पितः ।

प्रत्येकेषां लक्षणानि यथा–

**ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ।**
**व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्तितः ॥**
**शब्दार्थयोस्तु रसवन्मधुरं परिकीर्तितम् ।**

**१. ओजः –**

**दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः । ( का. प्र. – ८/६९ )**

मुख्यत्वेन अस्य गुणस्य वीररसे स्थितिः अनिवार्या, बीभत्से रौद्रे च गौणरूपेण अस्य स्थितिः स्वीकृता ।

गुणाः रसस्य धर्माः तथा च काव्ये रसस्य प्रधान्यम् अतः कस्य गुणस्य केन रसेन सह सम्बन्धः तदपि चिन्तनीयः; अतः एव एतस्य ज्ञानम् आवश्यकम् इति ।

वर्गाक्षरेषु प्रथमानां द्वितीयैः, तृतीयाणां चतुर्थैः, रेफेण सजातीयेन वा वर्णेन, टवर्गाक्षरैः शषवर्णदीर्घसमासैर्वा संयोगाद्गाढबन्धत्वरूपम् ओजः प्रादुर्भवतीति मम्मटोऽभिप्रैति।

उदाहरणं यथा –

**चञ्चद्भुजभ्रमितचण्डगदाभिघात-सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।**
**स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ।**

अत्र बन्धस्य परुषाक्षरबाहुल्यात् दीर्घसमासबाहुल्याच्च ओजः गुणः अस्ति ।

अत्र उदाहरणे सुदीर्घसमासानां समाहारः दृश्यते तथा च महाप्राणवर्णानां प्रयोगः भाषायाः आडम्बरः अधिकः प्रोक्तः अतः अत्र ओजः गुणः वर्तते ।

**२. प्रसादः -**

**शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ।**
**व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ॥ ( का. प्र. - ८/६९ )**

अयं गुणः सर्वेषु रसेषु सर्वासु रचनासु दृश्यते यथा शुष्ककाष्ठे वह्निः तत्क्षणं व्याप्नोति तथा च स्वच्छे जले यथा सर्वं स्पष्टं दृश्यते तथैव अस्मिन् गुणेऽपि तथा सामर्थ्यं वर्तते । सहसैव चित्ते व्याप्तः भवतीति भावः ।

प्रसिद्धार्थपदवत्त्वं प्रसादः । यत्र पदानि झटित्यर्थसमर्पकाणि भवन्ति तत्र प्रसादो गुणो भवति । वामनस्तु बन्धशैथिल्यं प्रसादः इति स चौजोगुणमिश्रितो भवेदिति मनुते ।

यथा-

**प्रतापरुद्रदेवोऽयं भाति लक्ष्मीपतिस्स्वयम् ।**
**येनास्य लोचने फुल्लपुण्डरीकमनोहरे ॥**

**३. माधुर्यम् -**

**आह्लादत्वं माधुर्यं शृङ्गारे द्रुतिकारकम् । ( का. प्र. - ८/६८ )**

चित्ते द्रुतिकारणं तथा च आह्लादकं तत्त्वं माधुर्यं कथ्यते । मुख्यत्वेन शृङ्गाररसे माधुर्यगुणः अनिवार्यः करुणरसे शान्तरसे अपि अयं गुणः आवश्यकः भवति । यत्र काव्यं भवति तत्र वर्णविन्यासः तथा च वर्णचयनं योग्यरीत्या नितान्तं विचार्य एतदुभयं विधेयमिति भावः ।

वाक्ये पृथक्पदता माधुर्यम् उच्यते । दीर्घसमासविरहितानां सरसानां पदानां रचना यत्र वर्तते तत्र माधुर्यं भवति । यथा -

**मधुरया मधुबोधितमाधवी मधुसमृद्धसमेधितमेधया ।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृतानिभृताक्षरमुज्जगे ।**

अत्र उदाहरणे अल्पसमासः दृश्यते तथा च न केवलम् ओजोगुणस्य नापि केवलं माधुर्यस्य प्रकाशनम् अपितु तयोः अतिरिक्तवर्णानां प्रयोगेण अत्र माधुर्यगुणः वर्तते ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) शौर्यादयः गुणाः कस्य सन्ति ?
(क) शरीरस्य (ख) आत्मनः (ग) मनसः (घ) बुद्धेः

(२) भरतमुनिना कति गुणाः स्वीकृताः ?
(क) दश (ख) नव (ग) पञ्च (घ) चत्वारः

(३) माधुर्यादयो गुणाः कस्य एव सन्ति ?
(क) शरीरस्य (ख) आत्मनः (ग) मनसः (घ) रसस्य

(४) सुदीर्घसमासानां समाहारः कुत्र दृश्यते ?
(क) ओजोगुणे (ख) प्रसादगुणे (ग) माधुर्यगुणे (घ) कान्तिगुणे

(५) कुत्र समासभूयस्त्वं मांसलं पदडम्बरं भवति ?
(क) ओजोगुणे (ख) प्रसादगुणे (ग) माधुर्यगुणे (घ) कान्तिगुणे

(६) 'व्यक्तार्थपदमग्राम्यम्' कः परिकीर्तितः ?

(क) ओजः (ख) कान्तिः (ग) प्रसादः (घ) माधुर्यम्

(७) यत्र पदानि झटित्यर्थसमर्पकाणि भवन्ति तत्र को गुणो भवति ?

(क) ओजः (ख) कान्तिः (ग) प्रसादः (घ) माधुर्यम्

(८) वामनमते कः प्रसादः गुणः ?

(क) बन्धदार्ढ्यम् (ख) बन्धमुक्तिः (ग) बन्धनम् (घ) बन्धशैथिल्यम्

(९) वाक्ये पृथक्पदत्वं किम् उच्यते ?

(क) प्रसादः (ख) माधुर्यम् (ग) ओजः (घ) तमः

(१०) 'मधुरया मधुबोधितमाधवी' इति कस्य उदाहरणम् अस्ति ?

(क) ओजोगुणस्य (ख) प्रसादगुणस्य (ग) माधुर्यगुणस्य (घ) धर्मगुणस्य

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) मम्मटमते कति गुणाः सन्ति ?

(२) उत्कर्षहेतवः के सन्ति ?

(३) गुणाः कस्य न सन्ति ?

(४) दश गुणाः केन स्वीकृताः ?

(५) अग्निपुराणे कति गुणाः कथिताः ?

(६) 'चञ्चद्भुज' इति कस्य गुणस्य उदाहरणम् अस्ति ?

(७) माधुर्यं किमुच्यते ?

**३. विवेचनात्मकम् उत्तरं लिखत ।**

(१) ओजोगुणं चर्चयत ।

(२) ओजोगुणस्य उदाहरणं विवेचयत ।

(३) प्रसादगुणस्य विवेचनं कुरुत ।

(४) माधुर्यगुणस्य लक्षणं विवेचयत।

**४. सविस्तरम् उत्तरं लिखत ।**

(१) गुणलक्षणं प्रतिपादयत ।

(२) ओजोगुणस्य लक्षणम् उदाहरणं च निरूपयत ।

(३) प्रसादगुणस्य लक्षणम् उदाहरणं च निरूपयत ।

(४) माधुर्यगुणस्य लक्षणम् उदाहरणं च निरूपयत ।

**शिक्षकप्रवृत्तिः**

- वामनोक्तदशगुणानां परिचयं कारयत ।

**छात्रप्रवृत्तिः**

- गुणानां अन्यानि उदाहरणानि काव्येभ्यः अन्विष्य लिखत ।

# ७ रीतयः

साहित्यशास्त्रे रसालङ्कारगुणाः यथा प्रमुखाः तथैव रीतिरपि प्रामुख्यं भजते । रीतिशब्दः रिङ्ग्धातोः समुत्पन्नः । रिङ्गताविति काव्येषु रीतिशब्दो मार्गशब्दस्य समानार्थकः अस्ति । महाराजः भोजः भणति –

**वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः ।**
**रिङ्ग् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ॥**

व्याख्यायाञ्च रीयन्ते परम्परया गच्छन्त्यनयेति करणसाधनोऽयं रीतिशब्दो मार्गपर्यायः । रीतिसम्प्रदायस्य प्रधानपुरुषो वामनोऽस्ति । स रीतेः स्पष्टीकरणमेवं प्रकारेण करोति –

**विशिष्टा पदरचनारीतिः विशेषो गुणात्मा-**

यथा गुणानां संख्याविषये नास्त्यैक्यं तथैव रीतिसंख्याविषयेऽपि नाद्यावधि निश्चितः मार्गः ।

अग्निपुराणे वैदर्भी, गौडी, पाञ्चाली, लाटीति चतस्रो रीतयः कथिताः । भामहः केवलं गौडी वैदर्भी चेति रीतिद्वयं मनुते । वामनः वैदर्भी गौडी पाञ्चाली चेति तिस्रो रीतीः स्वीकृतवान् ।

एतासां रीतीनां नामानि तत्तत्प्रान्तानुसारं सन्ति । अत विदर्भप्रान्तीया वैदर्भी, गौडप्रान्तीया गौडी, पाञ्चालप्रान्तीया पाञ्चाली, लाटप्रान्तीया लाटी इति वदन्ति ।

सम्प्रदायस्यास्य प्रधानाचार्यः वामन एव अस्ति । यतस्तेनैव रीतेः स्थानं काव्येष्वत्यादरेण गृहीतम्; **'रीतिरात्मा काव्यस्येति ।'**

विशिष्टायाः पदरचनायाः रीतिः इति नाम । राष्ट्रे देशे वा सर्वत्र वर्तमानाः जनाः एकविधामेव पदरचनां न कुर्वन्ति । पदरचना तावत् तत्तत्कवीनामभिरुचिमाधारीकृत्य प्रवर्तते । स्थानभेदं प्रदेशभेदं वा समभिलक्ष्य तत्तद्रीतीनां तानि तानि नामान्यासन् ।

रीतीनां वैशिष्ट्यम् अनया सङ्ग्रहकारिकया सरलरीत्या ज्ञातुं शक्यते –

**गौडी डम्बरबद्धा स्यात् वैदर्भी ललितक्रमा ।**
**पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥ (सा. द. - ९/५)**

**वामनमतेन**

**१. गौडीलक्षणम् -**

**ओजः कान्तिगुणोपेता गौडीया रीतिरिष्यते ।**

ओजोगुणोपेता कान्तिमती या रचना सा गौडी इति कथ्यते ।

**उदाहरणं यथा -**

**चञ्चद्भुजभ्रमितचण्डगदाभिघात-सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।**
**स्त्यानावनद्धघनशोणितशोणपाणिः उत्तंसयिष्यति कचांस्तव देवि भीमः ॥**

अत्र बन्धस्य परुषाक्षरबाहुल्यात् दीर्घसमासबाहुल्याच्च गौडीरीतिः अस्ति ।

अत्र उदाहरणे सुदीर्घसमासानां समाहारः दृश्यते तथा च महाप्राणवर्णानां प्रयोगः भाषायाः आडम्बरः अधिकः प्रोक्तः, अतः गौडीरीतिः वर्तते ।

**२. वैदर्भीलक्षणम् -**

**बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता ।**
**नातिदीर्घसमासा च वैदर्भीरीतिरिष्यते ॥**

रचनागतं शब्दगतं वा काठिन्यं यत्र न विद्यते, यत्र च रचना असमासा अल्पसमासा वा भवति तत्र वैदर्भीरीतिः ।

**उदाहरणं यथा -**

**लताकुञ्जन् गुञ्जन् मदवदलिपुञ्जं चपलयन्**
**समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।**
**मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्**
**रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥**

अत्रोक्तस्य उदाहरणस्य श्रवणपठनगानैः मधुरतायाः अनुभवः भवति । यतो हि अत्र पदानां समासः स्वल्पः अस्ति तथा च प्रयुक्ताक्षराणि अपि अल्पप्राणयुक्तानि सन्ति अतः अत्र वैदर्भीरीतिः वर्तते ।

**३. पाञ्चालीलक्षणम्**

**रीतिर्वैदर्भीगौडीयेत्युभयात्मिका ।**

इति कथनात् मृदुपरुषामध्यमसमासा च भवति पाञ्चालीरीतिः ।

**उदाहरणं यथा -**

**मधुरया मधुबोधितमाधवी मधुसमृद्धसमेधितमेधया ।**
**मधुकराङ्गनया मुहुरुन्मदध्वनिभृतानिभृताक्षरमुज्जगे ।**

अत्र उदाहरणे पञ्चषट्पदानां समासः दृश्यते तथा च न केवलम् ओजोगुणस्य नापि केवलं माधुर्यस्य प्रकाशनमपि तु तयोः अतिरिक्तवर्णानां प्रयोगेण अत्र पाञ्चालीरीतिः वर्तते ।

अत्र बन्धस्य नातिमृदुलत्वात् नातिपरुषत्वात् मध्यमसमासप्रायत्वाच्च इयं पाञ्चालीरीतिर्भवति ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) रीतिशब्दः कस्मात् धातोः समुत्पन्नः ?
(क) 'रिङ्' धातोः (ख) 'पठ्' धातोः (ग) 'रम्' धातोः (घ) 'खाद्' धातोः

(२) रीतिशब्दः कस्य समानार्थकः अस्ति ?
(क) अलङ्कारस्य (ख) गुणस्य (ग) रसस्य (घ) मार्गस्य

(३) रीतिसम्प्रदायस्य प्रधानपुरुषः कः अस्ति ?
(क) विश्वनाथः (ख) मम्मटः (ग) वामनः (घ) आनन्दवर्धनः

(४) का नाम रीतिः ?
(क) पदरचना (ख) विशिष्टा पदरचना (ग) सामान्या पदरचना (घ) कठिना पदरचना

(५) अग्निपुराणे कति रीतयः कथिताः ?
(क) चतस्रः (ख) तिस्रः (ग) पञ्च (घ) षट्

(६) रीतीनां नामानि कथं भवन्ति ?
(क) तत्प्रान्तानुसारम् (ख) तत्तद्देशानुसारम् (ग) विदेशानुसारम् (घ) यथेच्छम्

(७) तत्तत्कवीनामभिरुचिमाधारीकृत्य किं प्रवर्तते ?
(क) शब्दरचना (ख) अर्थरचना (ग) अक्षररचना (घ) पदरचना

(८) ओजोगुणोपेता कान्तिमती रचना का भवति ?

(क) गौडी (ख) पाञ्चाली (ग) लाटी (घ) वैदर्भी

(९) 'चञ्चद्भुज' इति कस्याः रीतेः उदाहरणम् ?

(क) वैदर्भी (ख) पाञ्चाली (ग) लाटी (घ) गौडी

(१०) रचनागतं शब्दगतं वा काठिन्यं यत्र न विद्यते, तत्र का रीतिः ?

(क) पाञ्चाली (ख) वैदर्भी (ग) लाटी (घ) गौडी

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) वामनाधारेण रीतयः कति सन्ति ?

(२) चतस्रः रीतयः कुत्र कथिताः ?

(३) रीतिद्वयं कः स्वीकरोति ?

(४) चतस्रः रीतीः कः स्वीकरोति ?

(५) ओजःकान्तिगुणोपेता का रीतिः ?

(६) बन्धपारुष्यरहिता का रीतिः ?

(७) उभयात्मिका का रीतिः ?

**३. विवेचनात्मकम् उत्तरं लिखत ।**

(१) रीतिलक्षणस्य विवेचनं कुरुत ।

(२) रीतिलक्षणं चर्चयत ।

(३) वैदर्भीलक्षणं लिखत ।

(४) पाञ्चालीलक्षणं लिखत ।

**४. सविस्तरम् उत्तरं लिखत ।**

(१) रीतिविषये आचार्याणां मतानि निरूपयत ।

(२) गौडीरीतिं लक्षणोदाहरणसहितां निरूपयत ।

(३) वैदर्भीरीतिं लक्षणोदाहरणसहितां निरूपयत ।

(४) पाञ्चालीरीतिं लक्षणोदाहरणसहितां निरूपयत ।

(५) 'मधुरया मधुबोधित' इति उदाहरणं संगमयत ।

**शिक्षकप्रवृत्तिः**

● प्रदत्तोदाहरणानां वर्गे लयबद्धं गानं कारयत ।

**छात्रप्रवृत्तिः**

● काव्येभ्यः रीतीनाम् अन्यानि उदाहरणानि अन्विष्य लिखत ।

●

# ८ रसस्वरूपम्

काव्यस्य प्रमुखं प्रयोजनम् – सद्यः परनिर्वृतिः अर्थात् तत्क्षणम् आनन्दप्राप्तिः, सा च आनन्दप्राप्तिः कथं भवतीति जिज्ञासायां साहित्यशास्त्रज्ञाः विद्वांसः समादधति – रसास्वादनेन रसानुभूतिकारणेन वा । काव्यानन्दस्तु रसास्वादनेनैव जायते इति सर्वस्वीकृतं मतम् । इत्थं काव्ये प्रमुखं तत्त्वं रस एव सिद्ध्यति । 'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति भरतमुनेः कथनं काव्ये रसस्य नितरां महत्त्वं प्रतिपादयति । कविराजो विश्वनाथः 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणे रससहितं वाक्यमेव काव्यं मत्वा काव्ये रसम् अभिन्नम् अनिवार्यं च स्वीचकार ।

साहित्यशास्त्रे षट्सम्प्रदायाः प्रसिद्धाः – (१) रससम्प्रदायः (२) अलङ्कारसम्प्रदायः (३) रीतिसम्प्रदायः (४) ध्वनिसम्प्रदायः (५) वक्रोक्तिसम्प्रदायः (६) औचित्यसम्प्रदायः ।

एतेषु सम्प्रदायेषु रससम्प्रदायः सर्वप्रथमः सर्वमान्यश्च वर्तते । रससिद्धान्तविषयिकीचर्चा नाट्यशास्त्रकाव्यप्रकाश-साहित्यदर्पणादिलाक्षणिकग्रन्थेषु विशदं निरूपिता । अस्य रससम्प्रदायस्य प्रवर्तकः आचार्यः भरतमुनिः । राजशेखरः काव्यमीमांसायां रसविवेचकत्वेन भरतमुनेरपि प्राचीनम् आचार्यनन्दिकेश्वरं मन्यते – 'रसाधिकारिकं नन्दिकेश्वरः' किन्तु तस्य न काचित् कृतिः सम्प्रति प्राप्यते, तेन कारणेन रसविषयकं तस्य मतं न ज्ञायते । इत्थं नाट्यशास्त्रे सर्वप्रथमं भरतमुनिः रसं काव्यात्मरूपेण प्रतिपादयामास; अतः स एव रससिद्धान्तस्य प्रवर्तकरूपेण स्वीक्रियते ।

**रसशब्दस्य अर्थः**

संस्कृतसाहित्ये रसशब्दः अतिप्राचीनो वर्तते । वेदेषु वैदिकसाहित्ये च रसशब्दः बहुधा प्रयुक्तो दृश्यते । यथा वेदे 'दधानः कलशे रसम्' तैत्तिरीयोपनिषदि 'रसो वै सः' 'रस ह्येवायं लब्ध्वानन्दी भवति' इति वचसा रसशब्दः परमात्मनः सन्दर्भे प्रयुक्तः अयं रसः ब्रह्मस्वरूपो भवति । परन्तु काव्यपरम्परायां निखिलेभ्यः रीति-गुण-वाच्यार्थ-लक्ष्यार्थ-ध्वनि-वक्रोक्ति-औचित्यादिभ्यः तत्त्वेभ्यः भिन्नस्थानीयः रसः । राजशेखरोऽपि प्रोवाच; 'रसादिश्चात्मा' ।

हैमकोषे रसशब्दः बहुषु अर्थेषु प्रयुक्तः यथा;

**रसः स्वादे जले वीर्ये शृंङ्गारादौ विषे द्रवे ।**
**बले रागे गृहे धातौ तिक्तादौ पारदेऽपि च ॥**

रसशब्दस्य इमाः व्युत्पत्तयः भवितुमर्हन्ति –

(१) रस्यते आस्वाद्यते इति रसः (२) रस्यते अनेन इति रसः (३) रसति रसयति वा रसः (४) रसनं रसः आस्वादः ।

अनेनाधारेण येषां पदार्थानामास्वादः क्रियते, यश्च पदार्थैः आस्वादः क्रियते, यः व्याप्नोति, यश्च आस्वादः इत्येते सर्वेऽपि रसपदवाच्यास्सन्ति । भरतमुनिः रसमेव समेषामर्थानां प्रवर्तकं मन्यते । अभिनवगुप्तः रसमेव सूत्रस्थानीयरूपेण रूपकेषु प्रकाशकं स्वीकरोति । तस्य मतानुसारेण नाट्यमेव रसः; रससमुदायः एव नाट्यमिति । इत्थं काव्ये रसस्य महिमानं बहवः साहित्यशास्त्रमर्मज्ञाः निरूपितवन्तः ।

**रसस्य उत्पत्तिः**

सर्वप्रथमं रसस्य उत्पत्तिविषये भरतमुनिना नाट्यशास्त्रे प्रतिपादितम् । अथर्ववेदः रसस्य उत्पादको वेद इति तन्मतम् । यथाह;

**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।**
**यजुर्वेदादभिनयान् रसानथर्वणादपि ।**

रससिद्धान्तप्रतिपादनाय वाल्मीकीयरामायणरचनायाः कथानकं स्मर्यते । तमसायाः तीरे निहतक्रौञ्चविरहितायाः क्रौञ्च्याः रोदनमाकर्ण्य करुणरसोत्पादनेन वाल्मीकेः शोकः श्लोकत्वेन परिणतः । यथा कथितमानन्दवर्धनाचार्येण;

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ ( ध्वन्यालोके १.५ )**

रसः काव्यस्यात्मभूतम् उद्भावकं च तत्त्वं वर्तते । नाट्यशास्त्रेऽपि कथितम् 'रसः सर्वेषां भावानां मूलम्, यथा बीजं वृक्षपुष्पादेः' 'रसैनैव सर्वं जीवति काव्यम्' इत्यादिवचोभिः अभिनवगुप्तः, अग्निपुराणकारश्च ''वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्'' इत्यनेन रसस्य आत्मीयस्थानत्वं स्वीकरोति ।

रामायणे 'रसैः श‍ृङ्गारकरुणरौद्रवीरभयानकैः' इति वचसा रसानामुल्लेखो वर्तते । भासकालिदासभवभूतिप्रभृतिभिरपि रससङ्केताः निजकाव्येषु प्रदत्ताः दृश्यन्ते । इत्थं रसपरम्परा अतिप्राचीना वर्तते ।

रसस्य किं स्वरूपम् ? कथं च रसनिष्पत्तिः ? इत्यादिषु प्रश्नेषु समुपजृम्भमाणेषु भरतमुनेः रससूत्रं मूलभूतं मन्यते ।

**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।**

नाट्यशास्त्रस्य षष्ठे अध्याये समागतमिदं सूत्रं सर्वेषां रसलक्षणानां प्रातिनिध्यं करोति । अस्मिन् सूत्रे विभाव – अनुभाव – व्यभिचारिभावशब्दाः सुस्पष्टाः एव । परन्तु 'संयोगात्' तथा 'निष्पत्तिः' इति द्वौ शब्दौ अतीव जटिलौ दृश्येते । बहवः विद्वांसः इमौ शब्दौ अनुसृत्य स्वीयां व्याख्यां प्रास्तुवन् । अत्र संयोगनिष्पत्तिशब्दौ आश्रित्य रससूत्रविमर्शाय चत्वारो वादा अपि प्रादुरभवन् ।

काव्यप्रकाशकारेण मम्मटेन विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिभावाश्च सहकारिणः इति स्वीकृत्य स्थायिभावः रसः मतः इति उक्तम् । यथा –

**कारणान्यथ कार्याणि सहकारीणि यानि च ।**

**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।**

**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।**

**व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः ॥ ( काव्यप्रकाशे ४.२७.२८ )**

विश्वनाथोऽपि विभावानुभावव्यभिचारिभावानां संयोगात् व्यञ्जनाव्यापारेण अभिव्यञ्जितं सहृदयानां हृदि विद्यमानं रत्यादिस्थायिभावं रसं मन्यते ।

**विभावेनानुभावेन व्यक्तः संचारिणा तथा ।**

**रसतामेति रत्यादिः स्थायिभावः सचेतसाम् ।। ( साहित्यदर्पणे - ३.१ )**

अयं रसः वेद्यान्तरस्पर्शशून्यः, ब्रह्मानन्दसहोदरः, चिन्मयस्वरूपः स्वाकारवदभिन्नत्वेनास्वाद्यते । सर्वप्रथमं विभावानुभावव्यभिचारिभावानां संक्षेपतो विवरणं दीयते ।

**विभावः**

रसानुभूतेः बाह्यकारणं विभावः । कायिक-वाचिक-सात्त्विकाभिनयानां विभावनम् अर्थात् ज्ञानं येनासौ विभावः । सामाजिकानां हृदि यः स्थायिभावः अस्ति तम् आस्वादयोग्यं निर्माति विभावः । विभावस्य द्वौ भेदौ स्तः (१) आलम्बनविभावः, (२) उद्दीपनविभावः ।

स्थायिभावस्य अविच्छिन्नप्रवाहरूपस्य रत्यादेः रमणीयविषयप्रतीत्यादेः लोके व्यवहारे च ये भावाः नायक-नायिकादयः ते आलम्बनविभावाः ये च रसप्रक्रियादयः उद्दीपकाः उद्यानचन्द्रिकादयः उद्दीपनविभावाः कथ्यन्ते ।

**अनुभावः**

अनु पश्चात् भवतीति अनुभावः । हृदयस्थान् स्थायिभावान् प्रकटयितुं यः शारीरिकः मानसिकश्च व्यापारः भवति स अनुभावः । अनुभावाः रसानुभूतेः बाह्याभिव्यक्तिप्रयोजकाः । 'अनुभावो विकारस्तु भावसंसूचनात्मकः' इति दशरूपककारेणापि कथितम् ।

नायक-नायिकादीनां रसानुगुणं रोमाञ्चहस्तविक्षेपणादिकार्याणि अनुभावाः उच्यन्ते ।

एतदतिरिक्तम्; स्तम्भः स्वेदः, रोमाञ्चः स्वरभङ्गः वेपथुः वैवर्ण्यम् अश्रु, प्रलयश्चेत्यपि भावाः अनुभावाः गोबलीवर्दन्यायेन सात्त्विकभावाः कथ्यन्ते ।

**व्यभिचारिभावः**

'विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः' इति विश्वनाथदिशा ये रसेषु नानारूपेण विचरणं कृत्वा रसं परिपोषयन्ति, रसम् आस्वादयोग्यं कुर्वन्ति ते व्यभिचारिणः । एतेषां व्यभिचारिभावानां संख्या त्रयस्त्रिंशत् वर्तते । निर्वेद-ग्लानि-शङ्का-असूया-मद-श्रम-आलस्यप्रभृतयः व्यभिचारिभावाः स्वयं चरणशीलाः भवन्ति । निष्कर्षतः उद्बुद्धस्थायिभावान् पोषयितुं ये सहकारिणो भवन्ति ते व्यभिचारिभावाः । एते एव 'सञ्चारिभावाः' इति कथ्यन्ते ।

**स्थायिभावः**

यः विरुद्धैः अविरुद्धैश्च भावैः न विच्छिद्यते यश्च सर्वभावेषु प्रधानत्वं भजते सः स्थायिभावः । विभावानुभावव्यभिचारिभावानां संयोगात् यो भावो अभिव्यज्यते अभिव्यक्तः (प्रकटितः) भवति स एव स्थायिभावः । मनुष्यः दैनिकजीवने यत् किमपि करोति तस्य संस्काराः वासनाः मनसि स्थिराः भवन्ति । काव्यशास्त्रे एते वासनारूपाः संस्काराः एव स्थायिभावाः कथ्यन्ते । काव्यशास्त्रे एतेषां संख्या नव प्रकीर्तिताः । यथा;

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।**
**जुगुप्सा विस्मयश्चेति निर्वेदो नवमस्तथा ॥**

एतैरेव स्थायिभावैः नवरसाः निष्पद्यन्ते । कस्यापि रसस्य निश्चयेन स्थायिभावो भवति । तेनैव रसनिष्पत्तिः । यथा रतिः स्थायिभावः शृङ्गारस्य, हासः हास्यस्य, शोकः करुणस्य, क्रोधः रौद्रस्य, उत्साहः वीरस्य, भयं भयानकस्य, जुगुप्सा बीभत्सस्य, विस्मयः अद्भुतस्य, निर्वेदश्च शान्तरसस्य स्थायिभावः प्रकीर्तितः ।

संक्षेपेण सहृदयानां हृदये रत्यादिस्थायिभावाः वासनारूपाः भवन्ति । आलम्बनविभावैः तेषां स्थायिभावानामाविर्भावो भवति । उद्दीपनविभावैः ते उद्दीप्ताः भवन्ति । लोके यथा कार्यरूपाः तथा काव्ये अनुभावाः स्थायिभावान् प्रतीतियोग्यान् कुर्वन्ति । व्यभिचारिभावैः तेषां पोषणं जायते । इत्थं विभावानुभावव्यभिचारिसंयोगात् स्थायिभावः अभिव्यक्तो भवति । ते स्थायिभावाः एव रसः इत्यभिधीयन्ते ।

**रससूत्रविमर्शः**

भरतस्य रससूत्रमनुसृत्य चत्वारः रसव्याख्यातारः भट्टलोल्लटादयः स्वमतं प्रतिपादयामासुः । ते च अधोलिखिताः सन्ति;

**भरतमुनेः रससूत्रम् -**
**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः**

↓

| ↓ | ↓ | ↓ | ↓ |
|---|---|---|---|
| **भट्टलोल्लटस्य उत्पत्तिवादः** | **आचार्यशङ्कुकस्य अनुमितिवादः** | **भट्टनायकस्य भुक्तिवादः** | **अभिनवगुप्तस्य अभिव्यक्तिवादः** |

**विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।**
**आनीयमानः स्वाद्यत्वं स्थायि भावो रसः स्मृतः ॥ (दशरूपक ॥ ४/१ ॥)**

नायक-नायिका-विदूषकादिभिः उद्यान-चन्द्र-चन्दनादिभिश्च आलम्बनोद्दीपनविभावैः, नेत्रकटाक्षादिभिः अनुभावैः, शङ्का - जडतादिभिः व्यभिचारिभावैः, स्तम्भस्वेदादिभिः सात्त्विकभावैः आस्वादनयोग्यतां नीतः (प्राप्तः) स्थायि भावः एव रसः

इति कथ्यते । अत्र एका शङ्का भवति यत् रामायणादिषु करुणप्रसङ्गावसरे प्रेक्षकाणामश्रुपातादीनि तु दुःखचिह्नानि तर्हि रसः कथम् आनन्दमयः ? तत्र उत्तररूपेण साहित्यदर्पणकारिकायाम् –

**करुणादावपि रसे जायते यत् परं सुखम् ।**
**सचेतसामानुभवः प्रमाणं तत्र केवलम् ॥**

अस्य तात्पर्यम् इदमेव यत्; यथा मरीचादिकटुपदार्थभक्षणानन्तरमपि अश्रुपातादयः भवन्ति तथापि किं जनाः तादृशभक्षणं त्यजन्ति ? नैव । तथैव करुणरसप्रधानासु कृतिषु रसिकानां भूयसी प्रवृत्तिः दृश्यते अतः रसः आदन्दमय एव इति सिद्धम् ।

आचार्यभरतमुनिः काव्यस्य प्रमुखतत्वरूपेण यं रसं प्रत्यपादयत् तं रसं प्रायः सर्वे परवर्तिनः आचार्याः केनापि माध्यमेन काव्यात्मरूपेण स्वीयग्रन्थेषु स्वीचक्रुः । यथा पक्वं भोजनं लवणं विना स्वादु न भवति तथैव शब्दार्थसहितं काव्यं रसं विना आस्वाद्यं न भवति । इत्थं रसस्य काव्ये प्रधानत्वं भवतीति सर्वेषां विदुषां मतैक्यम् । आनन्दवर्धनाचार्यस्य रसविषये भणितिः सत्यं भाति यत्; –

**दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।**
**सर्वे नवा इवाभान्ति मधुमास इव द्रुमा : ॥**

यथा शिशिरे दृष्टाः शुष्काः वृक्षाः वसन्ते नवपुष्पपल्लवान्विताः नूतनाः शोभन्ते तथा नीरसकाव्ये रसे स्थापिते सति तत् काव्यम् अपि शोभतेतराम् ।

**स्वाध्यायः**

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) रससम्प्रदायस्य प्रवर्तकः आचार्यः कः ?
(क) आचार्यभरतमुनिः (ख) अभिनवगुप्तः (ग) मम्मटः (घ) भामहः

(२) 'वाक्यं रसात्मकं काव्यम्' इत्युक्तिः कस्य ?
(क) मम्मटस्य (ख) भामहस्य (ग) विश्वनाथस्य (घ) कालिदासस्य

(३) रससम्प्रदायस्य कः प्रवर्तकः ?
(क) मम्मटः (ख) क्षेमेन्द्रः (ग) कुन्तकः (घ) आनन्दवर्द्धनः

(४) भरतमुनेः रससूत्रं नाट्यशास्त्रस्य कस्मिन् अध्याये अस्ति ?
(क) पञ्चमे (ख) षष्ठे (ग) सप्तमे (घ) दशमे

(५) नायकनायिकाः कस्मिन् भावे अन्तर्भवन्ति ?
(क) उद्दीपनविभावाः (ब) आलम्बनविभावाः (ग) व्यथिचारिणः (घ) अनुभावाः

(६) निर्वेदः कस्य रसस्य स्थायिभावः ?
(क) शान्तस्य (ख) करुणस्य (ग) अद्भुतस्य (घ)विस्मयस्य

(७) रामायणे कः रसः प्रमुखतया अभिप्रेतः ?
(क) श्रृङ्गारः (ख) वीररसः (ग) अद्भुतरसः (घ) करुणरसः

(८) कस्मिन् कोषे रसस्य पर्यायवाचिनः कथिताः ?
(क) अमरकोषे (ख) शब्दार्थकौस्तुभे (ग) हैमकोषे (घ) मेदिनीकोषे

(९) राजशेखरः कमाचार्यं भरतमुनेः प्राचीनं मन्यते ?
(क) यास्कम् (ख) भासम् (ग) नन्दिकेश्वरम् (घ) अभिनवगुप्तम्

(१०) काव्यशास्त्रे स्थायिभावाः कति ?
(क) चत्वारः (ख) नव (ग) दश (घ) अष्टौ

**२. 'क' विभागं 'ख' विभागेन सह संयोजयत ।**

| 'क' | 'ख' |
|---|---|
| (१) भट्टनायकः | (१) अभिव्यक्तिवादः |
| (२) भट्टलोल्लटः | (२) अनुमितिवादः |
| (३) अभिनवगुप्तः | (३) भुक्तिवादः |
| (४) आचार्यशङ्कुकः | (४) उत्पत्तिवादः |
| | (५) शून्यवादः |

**३. एकेन वाक्येन उत्तरं लिखत ।**

(१) भरतमुनिना प्रणीतस्य ग्रन्थस्य नाम किम् ?

(२) काव्यप्रकाशः कस्य आचार्यस्य कृतिः ?

(३) व्यभिचारिभावाः कति ?

(४) वैदिकसाहित्ये रसशब्दः कस्मिन् अर्थे गृहीतः ?

(५) दशरूपकस्य रचयिता कः ?

(६) काव्ये कार्याणि के भवन्ति ?

(७) विश्वनाथस्य कः ग्रन्थः सुप्रसिद्धः ?

**४. सविस्तरम् उत्तरं लिखत ।**

(१) 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रं स्पष्टयत ।

(२) स्थायिभावानां विषये विशदं चर्चयत ।

**५. विवेचनात्मकम् उत्तरं लिखत ।**

(१) 'रस' शब्दस्य अर्थः कः ?

(२) साहित्यशास्त्रस्य प्रसिद्धाः सम्प्रदायाः के ?

(३) काव्ये रसस्य आवश्यकतां विवेचयत ।

(४) रसविषये धनञ्जयमतं स्पष्टयत ।

**शिक्षकप्रवृत्तिः**

- रसवादविषये छात्रान् विशेषेण बोधयत ।

**छात्रप्रवृत्तिः**

- अभिज्ञानशाकुन्तलस्थविभावानुभावव्यभिचारिभावानां ज्ञानं सम्पादयत ।

●

| ९ | नवरसाः |
|---|---|

**को नाम रसः ?**

'वाक्यं रसात्मकं काव्यम्' इति विश्वनाथोक्तदिशा रससहितं वाक्यं काव्यम् अभिधीयते । अनेनाधारेण काव्ये रसस्य प्राधान्यं स्वीक्रियते । काव्यस्य मूलभूतम् अङ्गम् एव रसः । काव्यशास्त्रे यद् महत्वं रसेन प्राप्यते तादृशं महत्त्वम् अन्यैः तत्त्वैः न प्राप्यते । ऋग्वेदऋचायां सोमरससन्दर्भे रसः उपयुक्तः । उपनिषत्सु रसः परब्रह्मरूपेण प्रोक्तः यथा – 'रसो वै सः' । तैत्तिरीयोपनिषद् – २/७

अत्र रसः परब्रह्म । तत् प्राप्य जीवः आनन्देन आप्लावितः भवति ।

अग्निपुराणेऽपि महर्षिणा वेदव्यासेन उक्तम् –

**वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।** (अग्निपुराणम् - ३३७/३३)

राजा भोजः अपि स्वीये सरस्वतीकण्ठाभरणे काव्यं कथं रसान्वितम् इति कथयति यथा –

**रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ।** (सरस्वतीकण्ठाभरणम् – १/२)

यद्यपि रसस्य विस्तृतां व्याख्यां बहवः आचार्याः विद्वांसः च कृतवन्तः ततः निश्चप्रचं वयं नूतनम् एव चिन्तनं प्राप्तुं शक्नुमः । काव्यस्य लक्षणं यच्छन् साहित्याचार्यः विश्वनाथः साहित्यदर्पणे कथयति यत्- 'वाक्यं रसात्मकं काव्यम्' ।

इत्थम् उक्त्वा रसस्य प्राधान्यम् अनिवार्यत्वं च अत्र निर्दिष्टम् ।

तदनुसारं रसशब्दस्य सामान्यः परिचयः प्रदत्तः; अधुना रसस्य प्रकारान् पश्यामः चेत् –

नाट्यशास्त्रे अष्टौ रसाः विद्यन्ते नवमश्च शान्तरसः यश्च काव्यशास्त्रे उल्लिखितः । आहत्य रसानां सङ्ख्या नव । उक्तं च –

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**
**बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥** (साहित्यदर्पणः ३-२८२)

शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः इत्येव अष्टौ रसाः । तथैव शान्तोऽपि नवमः मतः । तान् संक्षेपेण अवगच्छामः चेत् –

**शृङ्गारः**

शृङ्गस्यार्थः कामस्य आविर्भावः । तस्य शृङ्गस्य उन्मेषकारणात् एव रसोऽयं शृङ्गारः उच्यते । प्रायः अयम् उत्तम प्रकृतियुतः भवति । रतिः अस्य स्थायी भावः विद्यते । अस्य वर्णः श्यामः देवश्च विष्णुः । रसोऽयं सत्त्व – प्रकृतियुक्तः तस्मात् सुखमयः । अत एवात्र नायकनायिकयोः उभयोः अपि सुखं भवति । शृङ्गारस्य द्वौ भेदौ स्तः – सम्भोगः विप्रलम्भः च । सम्भोगः नायिकारब्धः नायकारब्धः च इति द्विधा । विप्रलम्भशृङ्गारः आरम्भे दुःखमयः दृश्यते किञ्च अन्ते सुखमय एव भवति ।

**हास्यरसः**

विकारयुक्तात् अस्वाभाविकात् आकार–वचन–चेष्टादिभिः युक्तात् कौतुक–उत्पादयितुः जनात् हास्यरसः प्रकटितः भवति । अस्य स्थायिभावः हासः वर्णश्च श्वेतः ।

अस्याधिष्ठातृदेवः प्रमथगणः मतः । हास्यस्यापि षड् प्रकाराः वर्तन्ते । तद्यथा – स्मितम्, हसितम्, विहसितम्, अवहसितम्, अपहिसितम्, अतिहसितं च इति ।

(१) स्मितम् – यस्मिन् हास्ये नेत्रे ईषत् प्रफुल्लिते भवतः अधरः च सामान्यं स्फुरति तत् स्मितं कथ्यते ।

(२) हसितम् – यस्मिन् हास्ये दन्ताः क्वचित् दृश्यन्ते तत् हसितम् ।

(३) विहसितम् – यस्मिन् मधुरः रवः निर्गच्छेत् तत् विहसितम् ।

(४) अवहसितम् – यस्मिन् मधुरेण रवेण सह स्कन्धयोः शिरसः च कम्पनं भवेत् तत् अवहसितम् ।

(५) अपहसितम् – यस्मिन् मधुररवेण सहैव नेत्राभ्यां अश्रु उत्पद्येत तत् अपहसितम् ।

(६) अतिहसितम् – यस्मिन् रवेण सहैव अङ्गानाम् अपि विक्षेपः स्यात् तत् च अतिहसितम् उच्यते ।

इत्थं हास्यस्यापि षड्प्रकाराः वर्णिताः सन्ति ।

**करुणरसः**

इष्टवस्तुनः नाशेन अनिष्टवस्तुनः प्राप्त्या च करुणनामकः रसः उद्भवति । विद्वद्भिः अस्य रसस्य कपोतवर्णः (मलिनवर्णः) देवश्च यमः इति उक्तम् । अस्य शोकः स्थायिभावः वर्तते । विनष्टबन्ध्वादीनि शोचनीयानि वस्तूनि अस्य आलम्बनानि मन्यन्ते । दाहाद्यवस्थाः अस्या उद्दीपनरूपाः ।

दैवनिन्दाभूपातक्रन्दनविवर्णताउच्छ्वासनिःश्वासस्तम्भप्रलपनादयः अस्य अनुभावाः मन्यन्ते । निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमविषादजडताचिन्तोन्मादादीनि अस्य व्यभिचारिभावाः सन्ति ।

**रौद्रःरसः**

रौद्ररसे क्रोधः स्थायिभावः भवति । अस्य वर्णः रक्तः अधिष्ठातृदेवश्च रुद्रः अस्ति । अत्र आलम्बनविभावः शत्रुः भवति एवञ्च तस्य चेष्टाः उद्दीपनविभावाः सन्ति । मुष्टिप्रहारभूपातनविरुद्धाचरणद्वैधीकरण – (खण्डद्वयकरणम्) विदारणयुद्धेसत्वरतादिभिः कार्यैः अस्य उद्दीपनं प्रखरं भवति ।

भ्रुकुटेः वक्रीकरणम्, ओष्ठचर्वणम्, भुजताडनम्, तर्जनम्, स्वकृतशौर्यप्रशंसनम् शस्त्रचालनम्, आक्षेपकरणम्, क्रूरदृष्ट्या वीक्षणं च इत्यादीनि अस्य रौद्ररसस्य अनुभावाः सन्ति । आवेग-उग्रता-रोमाञ्च-प्रस्वेद-कम्पन-अहङ्कार-मोह-क्रोधादयः अस्य व्यभिचारिभावाः सन्ति ।

**वीररसः**

वीररसः अन्येषां रसानाम् अपेक्षया उत्कृष्टः भवति । अस्मिन् रसे उत्साहः स्थायिभावः भवति । अस्याधिष्ठातृदेवः इन्द्रः वर्णश्च स्वर्णः लक्षितः ।

ये जेतव्याः विद्यन्ते ते विजेतव्याः शत्रवः अस्यालम्बनविभावाः सन्ति । एषां विजेतव्यानां शत्रूणां चेष्टाः अस्य रसस्य उद्दीपनविभावाः सन्ति । धैर्य-मति-गर्व-स्मृति-तर्क-हर्षादयः अस्य व्यभिचारिभावाः सन्ति । वीररसोऽयं दानेन धर्मेण युद्धेन दयया च युक्तः चतुर्विधः भवति ।

**भयानकः रसः**

भयस्थायिभावयुक्तः रसः भयानकः । अस्याधिष्ठातृदेवः कालः । स्त्रियाश्रयः नीचाश्रययुतः कृष्णवर्णश्च तत्त्वविद्भिः अभिमतः । येत भयम् उत्पन्नं भवति तदेवात्र आलम्बनम् अभिमतम् । तस्य भयङ्कर्यः चेष्टाः उद्दीपनविभावस्य कार्यं कुर्वन्ति ।

अस्मिन् रसे विवर्णता – गद्गद्भाषणं – प्रलयः – स्वेदः रोमाञ्चः कम्पनम् – चतुर्दिक्षु वीक्षणम् – इत्यादयः अनुभावाः मन्यन्ते । जुगुप्सा – आवेग – मोह – त्रास – ग्लानिः – दीनता – शङ्का – अपस्मार – श्रान्तिः मरणादयः अस्य व्यभिचारिभावाः मन्यन्ते ।

**बीभत्सो रस ः –**

जुगुप्सास्थायिभावयुक्तः रसः बीभत्सः कथ्यते । अस्य वर्णः नीलः अधिष्ठातृदेवश्च महाकालः निर्दिष्टः । दुर्गन्धमयं मांसं रुधिरं मेदादयः च अस्य रसस्य आलम्बनविभावाः मन्यन्ते । एष्वेव दुर्गन्धमय-मांसादिषु कीटानां पतनादयः अस्योद्दीपनविभावाः मन्यन्ते निष्ठीवनं मुखपरिवर्तनं नेत्रयोः उन्मीलनम् इत्यादयः अस्य अनुभावाः सन्ति । मोहः, अपस्मारः, आवेगः, व्याधिः, मरणम् इत्यादयः अस्य व्यभिचारिभावाः भवन्ति ।

**अद्भुतः रसः –**

विस्मयस्थायिभावयुतः रसः अद्भुतः विद्यते । अस्याराध्यदेवः गन्धर्वः वर्णश्च पीतः । अलौकिकं वस्तु अस्यालम्बनविभावः अभिमतः । अलौकिकवस्तुनः गुणानुकीर्तनम् अस्य उद्दीपनं भवति ।

स्तम्भः स्वेदः – रोमाञ्चः – अस्पष्टः स्वरः – त्वरा – नेत्रविस्तारादयः अस्यानुभावाः मन्यन्ते । वितर्कः – आवेगः सम्भ्रान्तिः – हर्षादयश्च अस्य व्यभिचारिभावाः मन्यन्ते ।

**शान्तः रसः –**

शान्तः रसः शमरूपस्थायिभावयुतः उत्तमप्रकृतिवान् मतः । रसोऽयं कुन्दपुष्पम् इव चन्द्रमसः कमनीयशोभायुतः चास्ति । अस्याधिष्ठातृदेवः नारायणः । अनित्यादित्वात् समग्रसांसारिकविषयाणां निःसारत्वस्य ज्ञानं परमात्मनः स्वरूपस्य अवगमनम् अस्य आलम्बनविभावः अभिमतः ।

पवित्रः आश्रमः, हरिक्षेत्रम्, प्रयागादीनि तीर्थानि, रमणीयं वनम्, महापुरुषाणां सङ्गादयः अस्य रसस्य उद्दीपनस्वरूपाः वर्तन्ते । रोमाञ्चादयः अस्य अनुभावाः मन्यन्ते । इत्थमिव निर्वेद–हर्ष–स्मरण–मति–जीवदयादयः रसस्यास्य व्यभिचारिभावाः अभिमताः सन्ति ।

यत्र न सुखम्, न दुःखम्, न चिन्ता न द्वेषः, न रागः न च कीदृशी अपि कामना अवशिष्टा भवति सः सर्ववस्तुषु समप्रमाणयुतः शान्तः रसः भवतीति इत्थं मुनयः वदन्ति ।

**अन्ते च –**

नवरसरुचिरालङ्कृतिधारा वेदविषयवेदान्तविचारा ।
वैद्यव्योमशास्त्रादिविहारा विजयते धरायाम्... सुन्दरसुरभाषा ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) 'रसो वै सः' अस्मिन् वाक्ये कः अभिप्रेतः ?
(क) शृङ्गारः (ख) करुणः (ग) शिवः (घ) परब्रह्म

(२) रसानाम् आविर्भावः कस्मात् वेदात् ?
(क) ऋक् (ख) यजुः (ग) साम (घ) अथर्व

(३) नाट्यशास्त्रे कति रसाः सन्ति ?
(क) षट् (ख) सप्त (ग) अष्टौ (घ) नव

(४) शृङ्गारः कीदृशः प्रकृतियुतः भवति ?
(क) सत्त्व (ख) उत्तम (ग) रजः (घ) तमः

(५) कस्य रसस्य स्थायिभावः शोकः ?
(क) बीभत्सस्य (ख) अद्भुतस्य (ग) हास्यस्य (घ) करुणस्य

(६) कः रसः चतुर्विधः ?
(क) शृङ्गारः (ख) रौद्रः (ग) भयानकः (घ) वीरः

(७) भयानकरसस्य व्यभिचारिभावेषु अन्यतमः ......... ।
(क) ग्लानिः (ख) निर्वेदः (ग) व्याधिः (घ) कम्पनम्

(८) बीभत्सरसस्य कः स्थायिभावः ?
(क) उत्साहः (ख) जुगुप्सा (ग) शोकः (घ) रतिः

(९) नवमः शान्तः रसः कुत्र प्रयुक्तः ?
(क) उपनिषत्सु (ख) पुराणेषु (ग) काव्यशास्त्रे (घ) नाट्यशास्त्रे

(१०) शान्तरसस्य उद्दीपनाय उपयुक्तं स्थानं किम् ?
(क) युद्धक्षेत्रम् (ख) रमणीयं वनम् (ग) गुरुकुलम् (घ) सागरः

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) कः रसः अन्येषां रसानाम् अपेक्षया उत्कृष्टः भवति ?

(२) कः रसः सत्त्वप्रकृतियुक्तः ?

(३) विप्रलम्भशृङ्गारः आरम्भे कीदृशः भवति ?

(४) करुणरसस्य अधिष्ठातृदेवः कः ?

(५) रौद्ररसस्य वर्णः कः ?

(६) भयानकरसस्य स्थायिभावः कः ?

**३. सविस्तरम् उत्तरं लिखत ।**

(१) करुणरसस्य परिचयं कारयत ।

(२) हास्यरसस्य प्रकाराः कति सन्ति ? के च ते ?

(३) रौद्ररसस्य उद्दीपनं कथं भवति ?

(४) शान्तरसस्य विवेचनं विधीयताम् ।

(५) नाट्यशास्त्रे उपयुक्तानाम् अष्टौ रसानां नवमस्य शान्तस्य च रसस्य अधिष्ठातृदेवाः के के सन्ति ?

**४. टिप्पण्यः समाधेयाः ।**

(१) शृङ्गारः

(२) रौद्रः

(३) वीरः

(४) रसपरिचय :

**छात्रशिक्षकप्रवृत्तिः**

- अधः प्रदत्तं कोष्टकं दृष्ट्वा रसानां वर्ण-देवता-स्थायिभावानां विषये विशिष्टं ज्ञानं प्राप्नुयुः ।

| क्रमः | रसः | स्थायिभावः | वर्णः | देवता |
|---|---|---|---|---|
| १. | शृङ्गार | रतिः | श्यामः | विष्णुः |
| २. | हास्यः | हासः | श्वेतः | प्रमथः |
| ३. | करुणः | शोकः | कपोतः | यमः |
| ४. | रौद्रः | क्रोधः | रक्तः | रुद्रः |
| ५. | वीरः | उत्साहः | गौरः | इन्द्रः |
| ६. | भयानकः | भयम् | कृष्णः | कालः |
| ७. | बीभत्सः | जुगुप्सा | नीलः | महाकालः |
| ८. | अद्भुतः | विस्मयः | पीतः | ब्रह्मा |
| ९. | शान्तः | शमः | कुन्देन्दुशुभ्रः | श्रीनारायणः |

# १० अलङ्काराः

काव्यशास्त्रम् अलङ्काराशास्त्रमपि कथ्यते । एतेन एव ज्ञायते यत् काव्यशास्त्रे अलङ्काराणां कीदृशं महत्त्वमिति । एतत्कारणात् एकः अलङ्कारसम्प्रदायः अपि प्रसिद्धिं गतः । **''काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते, काव्यं ग्राह्यमलङ्कारात्'' ''अलङ्कृतिरिति अलङ्कारः''** इति सूक्तयः ज्ञापयन्ति यत् अलङ्काराः एव काव्यानि अलङ्कुर्वन्तीति । किं बहुना प्रायः साहित्यशास्त्रम् अलङ्कारशास्त्रमित्येव ज्ञायते । **अलङ्कार एव काव्यस्य आत्मा भवतीति आलङ्कारिकाणां मतम् ।**

अत एव अत्र अलङ्कारविषये अनिवार्यं किञ्चिद् विलिख्य केचन महत्त्वपूर्णाः अलङ्कारा सलक्षणं सोदाहरणं प्रस्तूयन्ते ।

**अलङ्कारभेदाः**

(१) शब्दालङ्कारः (२) अर्थालङ्कारः (३) उभयालङ्कारः ।

**(१) शब्दालङ्कारः** यः अलङ्कारः शब्दानां सौन्दर्येण काव्यस्य शोभावर्धनं करोति सः शब्दालङ्कारः कथ्यते । अस्य लक्षणम् अस्ति– **'शब्दपरिवृत्त्यसहत्वम्'** अर्थात् यत्र शब्दस्य परिवर्तनं कृत्वा तस्य पर्यायशब्दः स्थाप्यते चेत् अलङ्कारः तेन शब्देन सह नश्यति । अतः इदं ध्रुवं यत् अलङ्कारस्य स्थितिः तस्य शब्दविशेषस्य कारणात् एव एतदर्थमेव सः शब्दालङ्कारः इति कथ्यते । **शब्दालङ्काराः यमकादयः ।**

**(२) अर्थालङ्कारः** : ये अलङ्काराः अर्थानां सौन्दर्येण काव्यस्य शोभावर्धनं कुर्वन्ति, ते अर्थालङ्काराः । अस्य लक्षणम् अस्ति – **'शब्दपरिवृत्तिसहत्वम्'** अर्थात् यत्र शब्दपरिवर्तनानन्तरम् अपि अलङ्कारस्य सत्ता न समाप्यते तत्र अर्थालङ्कारः भवति । **अर्थालङ्काराः उपमादयः ।**

**(३) उभयालङ्कारः** : एषः अलङ्कारः शब्दार्थयोः द्वयोः अपि औचित्यम् अपेक्षते । तात्पर्यमस्ति यत् अस्मिन् उभयालङ्काराख्ये भेदे शब्दालङ्कारस्य अर्थालङ्कारस्य च उभयोः अपि गुणः सम्मिलितः भवति । अलङ्कारस्य अस्य प्रकारस्य स्थापनां महाराजभोजः सम्पादितवान् ।

**(१) यमकालङ्कारः** सम्प्रति एतेषु शब्दालङ्कारेषु यमकालङ्कारविषये विचार्यते ।

यमकालङ्कारस्य लक्षणं मम्मटाचार्येण एवं प्रतिपादितम् – यथा

यमकम् – अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनःश्रुतिः ।

अर्थात् – समानवर्णानां पदानां यत्र अर्थभेदः भवति तत्र यमकालङ्कारः भवति । एवमपि ज्ञातुं शक्यते यत् सदृशपदस्य पुनरावृत्तिः भवति परं तत्र अर्थभेदः अनिवार्यः । एते शब्दाः क्वचित् सार्थकाः क्वचित् निरर्थकाः अपि भवितुमर्हन्ति । किन्तु तेषां क्रमेण आवृत्तिः आवश्यकी भवति । क्रमेण आवृत्त्यभावे सति यमकं विहाय अनुप्रासः अलङ्कारः भवति ।

**यथा – शारदा शारदाम्भोजवदना वदनाम्बुजे ।**
**सर्वदा सर्वादास्माकं सन्निधिं सन्निधिं क्रियात् ॥**

अस्मिन् पद्ये शारदादिपदानां पुनरावृत्तिः वर्तते । परंतु अत्र प्रत्येकस्यापि अस्ति अर्थद्वयम् अतः अत्र यमकालङ्कारः अस्ति ।

**(२) श्लेषालङ्कारः**

श्लिष्टपदैः (अनेकार्थयुक्तपदैः) अनेकेषाम् अर्थानां प्रतिपादनं यत्र भवति तत्र श्लेषालङ्कारः भवति ।

**'श्लेषः स वाक्य एकस्मिन् यत्रानेकार्थता भवेत्'** ।

प्रायेण दृश्यते यत् बहूनाम् अर्थानां प्रतिपादनाय बहवः शब्दाः प्रयुज्यन्ते, किन्तु यत्र एकेन शब्देन एव एकाधिकार्थाः प्राप्यन्ते तत्र श्लेषः अलङ्कारः भवति । नाम यत्र एक एव शब्दः एकाधिकान् अर्थान् प्रकाशयति तत्र श्लेषः ।

**उदाहरणम् -**

**असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।**
**राजा हरति लोकस्य हृदयं मृदुभिः करैः ।**

अत्र अस्य श्लोकस्य द्विधा अर्थः अस्ति । एकः राजपक्षे अपरः चन्द्रपक्षे । उदयमारूढः वृद्धिं प्राप्तः राजा, उदयाचलं प्राप्तः चन्द्रः । कान्तिमान् - मुखे कान्तिमान् राजा, प्रकाशितः चन्द्रः । रक्तमण्डलः - अनुरागवता मण्डलेन सहितः राजा, रक्ततेजोवर्तुलधारकः चन्द्रः । मृदुभिः करैः- अल्पकरैः, कोमलकिरणैः, राजा-नृपतिः, चन्द्रः अपि विप्रराजः उक्तः ।

अत्र शब्दाः अनेकार्थाः अतः द्वौ अर्थौ प्राप्येते । प्रथमः अर्थः - वृद्धिं प्राप्तः राजा, मुखकान्तियुतः अनुरागवता मण्डलेन सहितः अल्पकरैः हृदयं हरति । द्वितीयः अर्थः उदयाचलं प्राप्तः चन्द्रः रक्ततेजोवर्तुलधारकः कोमलकिरणैः प्रकाशयन् हृदयं हरति ।

अत्र राजपदं विशेष्यमस्ति । तस्य विशेषणानि चत्वारि अर्थद्वयं धारयन्ति तेन च समस्तवाक्यसमूहस्य द्वौ अर्थौ निष्पन्नौ भवतः, अतः अत्र श्लेषालङ्कारः अस्ति ।

कैश्चित् आचार्यैः श्लेषस्य पुनः अपि त्रिप्रकारकाः भेदाः कृताः सन्ति । एते भेदाः सन्ति -

(१) सभङ्गश्लेषः (२) अभङ्गश्लेषः (३) सभङ्गाभङ्गश्लेषः ।

**अर्थालङ्काराः - उपमा**

सर्वेषामप्यलङ्काराणां मातेव उपमा सर्वोत्तमा वर्तते । अनयैव कालिदासः अपि प्रसिद्धः - उपमा कालिदास्य इति उक्त्या तस्याः उपमायाः लक्षणं मम्मटः मनुते -

**'साधर्म्यमुपमा भेदे' ।**

उपमानोपमेययोः भिन्नतायामपि तयोः साधर्म्यम् उपमा । साधर्म्यम् उपमायाः प्राणतत्त्वम् अस्ति । अलङ्कारेऽस्मिन् उपमेयम्, उपमानम्, साधारणधर्मः च उपमावचकः शब्दः इत्येतच्चतुष्टयम् आवश्यकं भवति । भेदे इति कथनेन अस्यालङ्कारस्य अनन्वयाद् भेदः सिद्ध्यति । काव्यप्रकाशकारः उपमायाः पञ्चविंशतिः भेदान् दर्शितवान् ।

**उदाहरणम् -**

**अम्भोरुहमिवाताम्रं मुग्धे करतलं तव ।**

हे मुग्धे ! तव हस्ततलं कमलतुल्यं रक्तं वर्तते । अत्र सुन्दर्याः करतलस्य कमलेन तुलना कृता वर्तते । करः उपमेयम्, कमलम् उपमानम्, इव उपमावाचकः शब्दः रक्तिमा च साधारणधर्मः । अत्र द्वयोः भिन्नपदार्थयोः रक्तिमसमानधर्मेण हृदयङ्गमा उपमा प्रदत्ता वर्तते । उपमावाचकाः शब्दाः, इव-यथा-समादयः सन्ति ।

**(२) रूपकम्**

अयमलङ्कारः साधर्म्यमूलकः वर्तते । एतस्य अलङ्कारस्य लक्षणं मम्मटः निरूपयति -

**'तद्रूपकमभेदो यः उपमानोपमेययोः' ।**

उपमानोपमेययोः अभेदः यत्र भवति तत्र रूपकालङ्कारः । कविः यदा उपमानोपमेययोः अभेदं कल्पयति तदायमलङ्कारः भवति । द्वयोः पदार्थयोः अतिसादृश्यादयमलङ्कारः सम्भवति ।

उभावपि भिन्नशब्दैः निरूपितौ भवतः । मम्मटाचार्यः अस्यालङ्कारस्य अष्टौ भेदान् प्रदर्शितवान् ।

**उदाहरणम्**

**मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्तकी तव ।**
**लीलावृत्तं करोतीति रम्यं रूपकरूपकम् ॥**

उदाहरणेऽस्मिन् भ्रूलतारूपायाः नर्तकीनायिकायाः मुखकमलरूपे रङ्गमञ्चे रमणीयं नृत्यं जायमानं वर्तते इति रूपितम् । अत्र भ्रूलतानर्तक्योः च मुखकमलरङ्गमञ्चयोः अभेदः कल्पितः वर्तते एवं उपमेयभ्रूलतायाम् उपमाननर्तक्याः च

मुखे रङ्गमञ्चस्य समारोपः कृतः अस्ति, अतः अत्र रूपकालङ्कारः अस्ति । अत्र ''एव'' इति वाचकं पदं भवति । यथा–मुखमेव चन्द्रः ।

**अनुप्रासः अलङ्कारः**

अनुप्रासशब्दः अनु; प्र इत्युपसर्गाभ्याम् असूञ् क्षेपणे धातौः निष्पन्नः भवति । यस्यार्थः अस्ति रसादेः अनुकूलः शब्दविन्यासः । स्वरस्य वैषम्ये अपि शब्दसाम्यं प्राप्यते यत्र तत्र अनुप्रासः अलङ्कारः भवति ।

एतस्य अलङ्कारस्य लक्षणं मम्मटः निरूपयति – 'वर्णसाम्यमनुप्रासः' । अर्थात् – यदि शब्देषु स्वराः समानाः न सन्ति किन्तु व्यञ्जनानां समानता प्राप्यते चेत् तत्र अनुप्रासः अलङ्कारः भवति । रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः ।

आचार्यविश्वनाथः अनुप्रासशब्दस्य व्युत्पत्तिं करोति –

**'रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः' ।**

अर्थात् रसानाम् अनुकूलः वर्णविन्यासः अनुप्रासः कथ्यते ।

**यथा – आदाय बकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान् ।**
**अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥**

उपर्युक्ते उदाहरणे 'गन्धानन्धी' शब्दे 'न' 'ध' वर्णयोः, 'कावेरीवारि' शब्दे 'व' 'र' वर्णयोः पावनः पवनः शब्दयोः 'प' 'व' 'न' वर्णानां समानता प्राप्यते यद्यपि स्वराः भिन्नाः सन्ति तथापि लक्षणानुसारम् अत्र अनुप्रासालङ्कारः विद्यते ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) काव्यशोभाकरान् धर्मान् कान् प्रचक्षते ?
(क) अलङ्कारान् (ख) रसान् (ग) गुणान् (घ) रीतीः

(२) काव्यस्य आत्मा कः भवति ?
(क) अलङ्कारः (ख) गुणः (ग) रसः (घ) रीतिः

(३) अलङ्कारस्य कति भेदाः भवन्ति ?
(क) पञ्च (ख) त्रयः (ग) सप्त (घ) दश

(४) कः अलङ्कारः शब्दानां सौन्दर्येण काव्यस्य शोभावर्धनं करोति ?
(क) उभयालङ्कारः (ख) रसः (ग) शब्दालङ्कारः (घ) अर्थालङ्कारः

(५) के अलङ्काराः अर्थानां सौन्दर्येण काव्यस्य शोभावर्धनं कुर्वन्ति ?
(क) उभयालङ्काराः (ख) रसाः (ग) शब्दालङ्काराः (घ) अर्थालङ्काराः

(६) शब्दार्थयोः द्वयोः अपि औचित्यम् कस्मिन् अलङ्कारे अपेक्षते ?
(क) उभयालङ्कारे (ख) रसे (ग) शब्दालङ्कारे (घ) अर्थालङ्कारे

(७) ''शारदा शारदाम्भोजवदना...'' इति कस्य अलङ्कारस्य उदाहरणम् ?
(क) यमकस्य (ख) उपमायाः (ग) रूपकस्य (घ) दृष्टान्तस्य

(८) श्लिष्टपदैः अनेकेषाम् अर्थानां प्रतिपादनं भवति तत्र कः अलङ्कारः भवति ?
(क) यमकः (ख) श्लेषः (ग) उपमा (घ) रूपकम्

(९) काव्यप्रकाशकारः उपमायाः कति भेदान् दर्शितवान् ?
(क) सप्तविंशतिः (ख) द्वाविंशतिः (ग) षड्विंशतिः (घ) पञ्चविंशतिः

(१०) उपमानोपमेययोः अभेदः कुत्र भवति ?
(क) यमकालङ्कारे (ख) श्लेषालङ्कारे (ग) उपमालङ्कारे (घ) रूपकालङ्कारे

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) यमकस्य किं लक्षणम् ?

(२) ''आदाय बकुलगन्धानन्धीकुर्वन् पदे पदे'' इति कस्य अलङ्कारस्य उदाहरणम् ?

(३) श्लेषस्य किं लक्षणम् ?

(४) उपमायाः किं लक्षणम् ?

(५) रूपकस्य किं लक्षणम् ?

(६) अनुप्रासस्य किं लक्षणम् ?

(७) स्वरस्य वैषम्ये अपि शब्दसाम्यं यत्र प्राप्यते तत्र कः अलङ्कारः भवति ?

**३. विवेचनात्मकम् उत्तरं लिखत ।**

(१) अलङ्कारलक्षणस्य विवेचनं कुरुत ।

(२) श्लेषालङ्कारं सोदाहरणं सलक्षणं चर्चयत ।

(३) उपमालङ्कारं सोदाहरणं सलक्षणं चर्चयत ।

(४) अनुप्रासालङ्कारं सोदाहरणं सलक्षणं चर्चयत ।

**४. सविस्तरम् उत्तरं लिखत ।**

(१) अलङ्कारलक्षणं निरूपयत ।

(२) यमकालङ्कारं सोदाहरणं सलक्षणं चर्चयत ।

(३) रूपकालङ्कारं सोदाहरणं सलक्षणं चर्चयत ।

(४) मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्तकी तव । लीलावृत्तं करोतीति रम्यं रूपकरूपकम् ॥
इत्युदाहरणं सङ्गमयत ।

**शिक्षकप्रवृत्तिः**

- विभिन्नालङ्कारिकाणां अलङ्कारलक्षणोदाहरणानि चर्चयत ।

**छात्रप्रवृत्तिः**

- पाठे प्रदत्तालङ्काराणाम् अन्योदाहरणानि अन्विष्य लिखत ।

●

# ११ काव्यप्रकाशपरिचयः

**काव्यप्रकाशपरिचयः**

परिष्कारयुगस्य आदिमः आलङ्कारिकः **मम्मटः** । एषः महान् वैय्याकरणः अपि आसीत् इति ज्ञायते । यतः तस्य ग्रन्थे बहुत्र सः महाभाष्यस्य उल्लेखं कृतवान् । काव्यप्रकाशकर्ता राजानकसंज्ञब्राह्मणकुलोत्पन्नो मम्मटाचार्यः काश्मीरे सञ्जातः इति विदुषां मतम् ।

भारतीयकाव्यशास्त्रे आचार्यमम्मटस्य योगदानमद्वितीयम् अस्ति । विद्वत्समाजः आचार्यमम्मटम् 'वाग्देवतावतारम्' मनुते ।

संस्कृतसाहित्याकाशे भरतभामहादयः नैके आचार्याः तारागण इव शोभन्ते । तत्र अन्यतमः आचार्यः श्रीमम्मटः । आचार्यमम्मटरचितः काव्यप्रकाशः साहित्यलक्षणग्रन्थेषु सर्वाङ्गपरिपूर्णः शोभते । अयं हि काव्यं कथं परीक्ष्यं विषयेऽस्मिन् सोदाहरणं लिखितः एकः विस्तृतः च अत्यन्तं महत्त्वपूर्णः तथा प्रामाणिकः ग्रन्थः वर्तते । ग्रन्थेऽस्मिन् काव्यं कथमध्येयम्, काव्यलक्षणम्, रसरीतिगुणदोषालङ्कारादीनि सर्वाण्यपि तत्त्वानि समुपलभ्यन्ते इति महद्वैशिष्ट्यम् ।

**ग्रन्थाध्यायाः**

आचार्यमम्मटः काव्यप्रकाशं दशविभागेषु विभक्तवान् । तत्र च प्रथमः उल्लासः, द्वितीयः उल्लासः इति नामाभिधानं कृतवान् । सम्प्रति प्रत्युल्लासं परिचयः प्राप्यते ।

**प्रथमोल्लासः - शीर्षकम् - काव्यप्रयोजन-कारण-स्वरूपविशेषनिर्णयः** अत्र मङ्गलाचरणं विधाय कविसृष्टेः विशेषताः, अनुबन्धम्, काव्यप्रयोजनानि, उपदेशस्य त्रिविधा शैली च चर्चिताः ।

ग्रन्थस्य प्रारम्भे विघ्नविनाशाय इष्टदेवतां नमति -

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥ १ ॥**

ग्रन्थकर्ता आचार्यः ग्रन्थस्य प्रारम्भम् अनेन मङ्गलश्लोकेन करोति । कविसृष्टिः जयति इति प्रतिपाद्य तस्याः वैशिष्ट्यं प्रदर्शयति । बह्मणा सृष्टिसर्जनाय दैवनियमाः पालनीयाः भवन्ति न कविना, ब्रह्मसृष्टौ सुखदुःखमोहादयः भवन्ति कविसृष्टौ केवलमानन्दः । ब्रह्मणा सृष्टिसर्जनाय कार्यकारणाद्याः स्वीकर्तव्याः भवन्ति, परं कविना काव्यसर्जने न तादृशाः नियमाः पालनीयाः । ब्रह्मसृष्टौ कटुकषायादयः षड्रसाः परं कविसृष्टौ शृङ्गारादयः नवरसाः अतः कविसर्जनं सर्वश्रेष्ठं वर्तते ।

काव्यस्य किं प्रयोजनमित्यत्र आचार्यः कथयति -

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ २ ॥**

काव्यं कालिदासादीनामिव यशः, श्रीहर्षादेरिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, मयूरादीनामिव अनर्थनिवारणम्, आनन्दम् कान्तेव अभिमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवत् इत्युपदेशं च यथायोगं कवेः सहृदयस्य च करोति, अतः काव्यं पठनीयं रचनीयं च ।

अत्रैव सः काव्यस्य निर्माणे तत्त्वत्रयं शक्तिनिपुणताभ्यासम् महत्त्वपूर्णं स्वीकृत्य सर्वांगपूर्णकाव्यलक्षणमपि प्रतिपादितवान् - **तददोषौ शब्दार्थो सगुणानवनलङ्कृती पुनः क्वापि ।** दोषरहितौ गुणयुक्तौ क्वचिद् अलङ्काररहितावपि शब्दार्थौ काव्यम् ।

अन्ते च काव्यप्रकारत्रयम् उत्तममध्यमाधमभेदेन निरूपितवान् ।

**द्वितीयोल्लासः - शीर्षकम् - शब्दार्थस्वरूपनिर्णयः ।** अत्र शब्दस्वरूपविषये मम्मटेन लिखतं यत् शब्दः वाचकः, लाक्षणिकः, व्यञ्जकः इति त्रिविधः भवति । अर्थः अपि वाच्यार्थः, लक्ष्यार्थः, व्यङ्ग्यार्थः इत्येवं त्रिविधः कथितः । अर्थप्राप्तिश्च शक्त्या जायते तस्मात् शक्तिविषये पूर्ववर्तिनाम् आचार्याणां मतानि निरूप्य स्वमतं प्रतिपादितवान् । स च शब्दशक्तीः अभिधा-लक्षणा-व्यञ्जनाः संलक्ष्य व्यञ्जनां काव्याय सर्वोत्तमाममन्यत । मुख्यार्थबोधिकाभिधा प्रथमा, लक्ष्यार्थबोधिका लक्षणा द्वितीया, व्यङ्ग्यार्थबोधिका व्यञ्जना तृतीया । अन्ये तात्पर्यनामिकां तुरीयां शक्तिं स्वीकुर्वन्तीति उक्तवान् ।

**तृतीयोल्लासः - शीर्षकम् - अर्थव्यञ्जकतानिर्णयः** । अत्र अर्थस्य विशदी व्याख्या कृता । अर्थः कः ? अर्थस्य कति भेदाः भवितुमर्हन्ति । पूर्वाचार्यः अस्मिन् विषये किं कथितवान् ? इति निरूप्य मम्मटेन स्वमतं स्फुटरूपेण प्रस्तुतम् ।

**चतुर्थोल्लासः - शीर्षकम् - ध्वनिनिर्णयः** । अत्र मम्मटेन ध्वनिकाव्यस्य विषये विशदविवेचनं प्रतिपादितम् अस्ति । अत्र तेन सम्पूर्णं रस-भावनिरूपणमपि स्फुटरूपेण प्रतिपादितं तथा च पूर्वाचार्याणां मतानि अपि प्रस्तूय तद्विवेचनं कृतम् । रसे व्यञ्जकता कथं निर्मिता भवति, सा च कथं श्रोतुः सकाशं प्राप्नोति तथा ध्वनिना तस्याः किं तादात्म्यम् इति अस्मिन् अध्याये दर्शितम् ।

**पंचमोल्लासः - शीर्षकम् - ध्वनिगुणीभूतव्यङ्ग्यसंकीर्णभेदनिर्णयः** ।

अत्र गुणीभूतव्यङ्ग्यकाव्यस्य अष्टौ भेदाः कृताः । अत्र मम्मटः पूर्वाचार्यैः कृताः गुणीभूतव्यङ्ग्यकाव्यस्य परिभाषाः सूक्ष्मदृष्ट्या विलोकितवान्, ततः तासां विवेचनं कृत्वा तत्खण्डनं विधाय सगौरवं स्वमतं प्रस्थापितवान् ।

**षष्ठोल्लासः - शीर्षकम् - शब्दार्थचित्र-निरूपणम्** ।

अत्र चित्रकाव्यस्य द्वौ भेदौ दर्शितौ यथा - (१) शब्दचित्रम् (२) अर्थचित्रम् । अत्रापि तेन पूर्वाचार्याणां परिभाषाचिन्तनं प्रस्तूय उदाहरणानि च समालोच्य चित्रकाव्यविषये अपेक्षितं सर्वमपि स्पष्टं प्रस्तुतम् ।

**सप्तमोल्लासः - शीर्षकम् - दोषदर्शनम्** ।

अत्र काव्यस्य दोषविषये विस्तृतं व्याख्यातम् । श्रुतिकट्वादयः षोडश दोषाः परिगणिताः सविस्तरं च चर्चिताः ।

**अष्टमोल्लासः - शीर्षकम् - गुणालङ्कारभेदनिर्णयः** ।

अत्र काव्यस्य गुणाः, तद्भेदाः, तद्भेदानां व्याख्या, आचार्यवामनदर्शितानां दशार्थगुणानां खण्डनं तथा गुणानुसारिणीरचनायाः अपवादानां विवेचनं कृतम् ।

**नवमोल्लासः - शीर्षकम् - शब्दालङ्कारनिर्णयः** ।

अत्र शब्दालङ्काराणां परिभाषा, उदाहरणानि प्रदर्श्य प्रयोगस्य च अपवादानां वर्णनम् अस्ति ।

**दशमोल्लासः - शीर्षकम् - अर्थालङ्कारनिर्णयः** ।

अत्र अर्थालङ्काराणां परिभाषा, उदाहरणानि प्रदर्श्य तद्विवेचनं विधाय वर्णनं प्रस्तुतम् ।

मम्मटकृता अलङ्कारव्याख्या अथवा मम्मटकृतानि अलङ्कारलक्षणानि प्रायः सर्वत्र पाठ्यन्ते एवदेव एतस्य ग्रन्थस्य महत्त्वं प्रस्तौति ।

ग्रन्थेऽस्मिन् बहुभिर्विद्वद्भिः टीकाः विहिताः, परन्तु कतिपयमुख्याः अधोनिर्दिष्टाः सन्ति ।

| क्रम सं. | टीका | कर्ता | समयः |
|---|---|---|---|
| १. | सङ्केतः | माणिक्यचन्द्रः | सं-१२१६ सन् ११६० ई |
| २. | बालचित्तानुरञ्जनी | सरस्वतीतीर्थः | सं-१३९८ सन् १२४२ ई |
| ३. | दीपिका | जयन्तभट्टः | सं-१३५० सन् १२९३ ई |
| ४. | दर्पणः | विश्वनाथः | सं-१२१६ सन् ११६० ई |
| ५. | सारबोधिनी | श्रीवत्सलाञ्छनः | सं-१२१६ सन् ११६० ई |

काव्याध्ययनशीलानां विदुषां कृते अयं ग्रन्थः अतीव महत्त्वपूर्णः अस्ति ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) काव्यप्रकाशस्य रचयिता कः अस्ति ?

(क) विश्वनाथः (ख) मम्मटः (ग) वामनः (घ) चरकः

(२) मम्मटस्य कः ग्रन्थः अस्ति ?

(क) साहित्यदर्पणः (ख) काव्यदर्पणः (ग) काव्यप्रकाशः (घ) ध्वन्यालोकः

(३) काव्यप्रकाशस्य कति उल्लासाः सन्ति ?

(क) पञ्च (ख) नव (ग) सप्त (घ) दश

(४) काव्यप्रकाशस्य कस्मिन् उल्लासे काव्यलक्षणं कथितम् अस्ति ?

(क) अष्टमे (ख) प्रथमे (ग) पञ्चमे (घ) चतुर्थे

(५) काव्यप्रकाशस्य कस्मिन् उल्लासे रसचर्चा अस्ति ?

(क) तृतीये (ख) चतुर्थे (ग) पञ्चमे (घ) षष्ठे

(६) काव्यप्रकाशस्य कस्मिन् उल्लासे दोषाः चर्चिताः सन्ति ?

(क) अष्टमे (ख) दशमे (ग) सप्तमे (घ) षष्ठे

(७) काव्यप्रकाशस्य सप्तमोल्लासस्य शीर्षकं किमस्ति ?

(क) शब्दालङ्कारनिर्णयः (ख) अर्थालङ्कारनिर्णयः (ग) दोषनिर्णयः (घ) गुणनिर्णयः

(८) काव्यप्रकाशस्य नवमोल्लासस्य शीर्षकं किमस्ति ?

(क) शब्दालङ्कारनिर्णयः (ख) अर्थालङ्कारनिर्णयः (ग) रसनिर्णयः (घ) गुणनिर्णयः

(९) काव्यप्रकाशस्य कस्मिन् उल्लासे अलङ्काराः चर्चिताः सन्ति ?

(क) अष्टमे (ख) दशमे (ग) पञ्चमे (घ) षष्ठे

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) कस्य उल्लासस्य शीर्षकम् – ध्वनिनिर्णयः इति ?

(२) गुणीभूतव्यङ्ग्यकाव्यस्य कति भेदाः सन्ति ?

(३) पञ्चमोल्लासस्य शीर्षकम् किम् अस्ति ?

(४) शब्दार्थचित्रनिरूपणम् कस्य उल्लासस्य शीर्षकम् अस्ति ?

(५) चित्रकाव्यस्य कति भेदाः भवन्ति ?

(६) मम्मटेन कति गुणानां खण्डनं कृतम् ?

(७) श्रुतिकट्वादयः कति दोषाः परिगणिताः सन्ति ?

**३. विवेचनात्मकम् उत्तरं लिखत ।**

(१) काव्यलक्षणस्य विवेचनं कुरुत ।

(२) काव्यप्रयोजनानि चर्चयत ।

(३) शब्दस्य त्रैविध्यं निरूपयत ।

(४) चतुर्थोल्लासस्य सारं लिखत ।

**४. सविस्तरम् उत्तरं लिखत ।**

(१) काव्यप्रकाशस्य यथेच्छं पञ्चटीकानां नामानि लिखत ।

(२) प्रथमोल्लासस्य शीर्षकं विलिख्य सारं लिखत ।

(३) द्वितीयोल्लासस्य शब्दार्थनिरूपणं लिखत ।

(४) पञ्चमोल्लासस्य शीर्षकं विलिख्य सारं लिखत ।

(५) अष्टमोल्लासस्य शीर्षकं विलिख्य सारं लिखत ।

**शिक्षकप्रवृत्तिः**

- अलङ्कारशास्त्राय मम्मटाचार्यस्य योगदानं विवेचयत ।

**छात्रप्रवृत्तिः**

- स्फोरकपत्रे चित्रकाव्यस्य कमपि एकं प्रकारमाधृत्य लिखत ।

●

| १२ | सूक्तयः |
|---|---|

**प्रास्ताविकम्** -

विविधग्रन्थेषु कविभिः ग्रन्थलेखनावसरे स्वीयं प्रस्तुतं विषयवस्तु दृढीकर्तुं काश्चन काव्यरत्नकणिकाः स्थाप्यन्ते । याभिः काव्ये अर्थान्तरन्यासः पुष्टिं प्रयाति । एतैः सुभाषितवाक्यैः विषयस्य प्रस्तुतिः प्रमाणिता भवति । इमानि लघुलघुवाक्यानि घटसागरन्यायेन विशिष्टं गहनं च सत्यं स्थापयितुं प्रभवन्ति ।

यथा किमपि विशिष्टं भोजनं यदि विशिष्टैः द्रव्यैः सज्जीकृत्य प्रस्तूयते चेत् तद् भोजनं भोजनाभिरुचिं वर्धयति तथैव इमानि सुभाषितवाक्यानि सूक्तयः वा काव्यशोभां काव्यपठनाभिरुचिं च वर्धयन्ति । इमानि तादृशानि-अक्षरबीजानि सन्ति येषु वटवृक्षाणां सम्भावनाः परिपाल्यन्ते ।

अत एव केनचिद् भणितम् -

**''पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्'' इति ।**

एतत्सर्वं विचार्यात्र काश्चन सूक्तयः प्रस्तुताः ।

**(१) सत्सङ्गतिः कथय किन्न करोति पुंसाम् ॥ (नीतिशतकम्-१९)**

**अर्थः** - वद, सतां सङ्गमः मनुष्याणां किं किं न साधयति ?

**स्पष्टीकरणम्** - सज्जनानां सङ्गमेन मनुष्येषु किं किं परिवर्तनं न भवति ? इति भावं नीतिशतककारः भर्तृहरिः प्रकटयति । सत्सङ्गतिः बुद्धेः जाड्यं हरति, वाचि सत्यं सिञ्चति, सम्मानमुन्नतिं च ददाति, पापात् निवारयति, मनः प्रसादयति, सर्वासु च दिक्षु कीर्तिं वितनोति । अतः सर्वैः जनैः सतां सङ्गमः कर्तव्यः ।

**(२) न खलु वयस्तेजसो हेतुः ॥ (नीतिशतकम् - ३८)**

**अर्थः** - तेजस्वितायाः कारणम् आयुः न भवति ।

**स्पष्टीकरणम्** - अस्मिन् संसारे कदाचित् लघुबालकोऽपि वामनसदृशः पूजनीयः तेजस्वी च दृश्यते । यथा सिंहशावकः मदोन्मत्तेषु गजेषु प्रहरति स्वसत्त्वं प्रकटयति च तथैव लघुबालः अपि अल्पायुः सन्नपि तेजस्वी भवति । कथितं च 'योऽनूचानः स नो महान्' इति ॥ अर्थात् यः वेदवेदाङ्गज्ञः स एव महान् भवति ।

**(३) तृष्णा न जीर्णा वयमेव जीर्णाः ॥ (वैराग्यशतकम् - १२)**

**अर्थः** - तृष्णाः न कदापि वृद्धाः भवन्ति, वयमेव वयसा वृद्धाः भवामः ।

**स्पष्टीकरणम्** - भर्तृहरिः वैराग्यशतके मनुष्यजीवनं वर्णयन् कथयति यत् कदापि अस्माकं भोगाः न भुज्यन्ते, अस्माकं तपः न तप्यते, अस्माकं कालः न गच्छति, न च अस्माकं महेच्छा पूर्णा भवति परन्तु क्रमशः वयमेव कालाभावात् भुक्ताः, तप्ताः, याताः जीर्णाश्च भवामः । अतः मनुष्येण सदा सर्वेषु वस्तुषु सन्तोषः करणीयः - 'सन्तोष एव पुरुषस्य परं निधानम्' इति वचनानुसारम् ।

**(४) हितं मनोहारि च दुर्लभं वचः । (किरातार्जुनीयम् - १/४)**

**अर्थः** - हितकरं मनोहरं च वाक्यं दुर्लभं भवति ।

**स्पष्टीकरणम्** - किरातार्जुनीयस्य प्रणेता भारविः कथयति वाक्ये यत्र हितं निहितं स्यात्, तत् वाक्यं मनोहरम् अपि स्यात् इति उभयं दुर्लभं भवति । मनुष्यः प्रियं वदति तत् कदाचित् हितकरं न भवति । यच्च हितकरं वदति तत् प्रियमपि कदाचित् न भवति । यथा औषधं कटु भवति, तथापि रुग्णस्य कृते हितकरं भवति, तथैव सर्वेभ्यः अतिमधुरा शर्करा रोचते परन्तु आरोग्यरक्षणे हितकारिणी न भवति । मनुष्येण हितकरे वचने अवधेयं न तु केवलं प्रियवचनेषु प्रीतिः विधेया इति बोधः ।

**(५) विवेकभ्रष्टानां भवति विनिपातः शतमुखः । नीतिशतकम् - १०**

**अर्थः** - विवेकशून्यानाम् अधोगतिः अनेकैः प्रकारैः जायते ।

**स्पष्टीकरणम्** – प्रस्तुतसूक्तौ भर्तृहरिः अविवेकिनः जनस्य अवस्थां निरूपयति गङ्गायाः उदाहरणेन । यथा गङ्गा अभिमानेन विवेकभ्रष्टा सती स्वर्गात् शिवस्य शिरसि, शिरसः हिमालये हिमालयात् भूमौ, ततः समुद्रे अधोगतिं प्राप्तवती तथा अविवेकी मनुष्यः अभिमानात् सर्वतः अधोगतिं प्राप्नोति । विवेकः एव पशुमनुष्ययोः भेदं प्रकटयति ।

**( ६ ) दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् । ( वेणीसंहारम् – ३/३७ )**

**अर्थः** – जन्मग्रहणं भाग्याधीनं भवति, पुरुषार्थः तु ममाधीनः अस्ति ।

**स्पष्टीकरणम्** – भट्टनारायणस्य वेणीसंहारे कर्णस्य इयमुक्तिः वर्तते । भाग्यवशात् मनुष्यस्य जन्म भवतु नाम कस्मिन्नपि कुले परन्तु पुरुषार्थेन मनुष्यः स्वीयं भाग्यं स्वयं निर्मातुं शक्नोति । कर्णः कथयति – मम जन्म सूतकुले जातं तत् भाग्याधीनं वर्तते परन्तु ममाधीनं सामर्थ्यम् उद्यमः परिश्रम एवास्ति । मनुष्यः परिश्रमेण कर्मणा च महान् भवति न जन्मना न च कुलेनेति हार्दम् ।

**( ७ ) क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः । ( शिशुपालवधम् – ४/१७ )**

**अर्थः** – यत् प्रतिक्षणं नवीनं प्रतिभाति तदेव रमणीयत्वम् ।

**स्पष्टीकरणम्** – माघः अस्यां सूक्तौ रमणीयतायाः परिभाषां यच्छन् कथयति यत् वस्तु तत्त्वं वा क्षणे क्षणे नवीनतां प्राप्नोति तत् रमणीयत्वं कथ्यते । रैवतकपर्वतस्य (गिरनारस्य) सौन्दर्यं दर्शं दर्शं माघ–कविः तां रमणीयताम् आस्वादयन् कथयति; यथा तडागः रमणीयः नास्ति, यतः तत्र नवीनं किमपि न भवति । परन्तु नदीप्रवाहः रमणीयः भवति । यतः सर्वदा प्रतिक्षणं सा नदी प्रवहति । यदा मनुष्यस्य जीवने नवीनता आयाति तदा तस्य जीवनं रमणीयं भवति इति भावः ।

**( ८ ) सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । ( किरातार्जुनीयम् २/३० )**

**अर्थः** – किमपि कार्यं सहसा न करणीयम्, अविवेकः (मूर्खता) महद्दुःखं प्राप्नोति ।

**स्पष्टीकरणम्** – मनुष्यः यदा विचारम् अकृत्वा सहसा किमपि कार्यं करोति तदा सः महतीम् आपत्तिं प्राप्नोति । भारवेः प्रसिद्धा इयं सूक्तिः अस्माकं कृते महान्तमुपदेशं ददाति, यत् अविचार्य मनुष्येण अविवेकेन आवेगेन अत्युत्साहेन च न कदापि कार्यं करणीयम् । यथा अस्माकं जीवने अविवेकेन विपत्तिः आगन्तुं शक्नोति । अस्माभिः धैर्येण विवेकेन च क्रियासु प्रवर्तनीयमिति भावः ।

**( ९ ) न निश्चितार्थाद् विरमन्ति धीराः । ( नीतिशतकम् – ८८ )**

**अर्थः** – धैर्यशालिनः अभीष्टप्राप्तिं विना कार्यं न त्यजन्ति ।

**स्पष्टीकरणम्** – समुद्रमन्थनप्रसङ्गमाश्रित्य इयं सूक्तिः नीतिशतके लिखिता अस्ति । देवाः समुद्रमन्थने रत्नानि प्राप्यापि न तुष्टाः । भयङ्करेण विषेणापि न भीताः अन्ते च यावत् अमृतं न प्राप्तवन्तः तावत् धैर्यं न त्यक्तवन्तः तथैव धीराः विद्वांसः अपि अभीष्टं वस्तु प्राप्य एव विरमन्ति । अस्माभिः अपि यावत् कार्ये पूर्णसिद्धिः न प्राप्यते तावत् विश्रामः न कार्यः इति भावः ।

**( १० ) सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ( नीतिशतकम् – ५८ )**

**अर्थः** – सेवाधर्मः अत्यन्तं कठिनः वर्तते योगिनां कृते अपि – अगम्यः वर्तते ।

**स्पष्टीकरणम्** – बहूनां जनानां कथनं यत् सेवाकार्यम् अतिसरलमस्ति परन्तु सेवाधर्माचरणे योगिनामपि अवबोधो न भवति । यदि सः मौनेन तिष्ठति चेत् मूर्खः, यदि बहु भाषते चेत् जल्पकः, यदि समीपे भवति चेत् धृष्टः, दूरे भवति चेत् मूर्खः, क्षमाशीलः चेत् भीरुः, अपि च असहनशीलश्चेत् अकुलीनः मन्यते, इत्थं सेवाकर्मणि सर्वेषां चातुर्यं पारङ्गतत्वं न भवति । योगिनः अपि अस्मिन् कर्मणि अकुशलाः भवन्ति ।

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) सत्सङ्गतिः केषां किन्न करोति ?

(क) पशूनाम् (ख) देवानाम् (ग) पुंसाम् (घ) राक्षसाणाम्

(२) तेजसः कः हेतुः न भवति ?

(क) ज्ञानम् (ख) वयः (ग) धनम् (घ) दानम्

(३) का जीर्णा न भवति ?

(क) तृष्णा (ख) प्रकृतिः (ग) मतिः (घ) गतिः

(४) केषां विनिपातः शतमुखः भवति ?

(क) बलवताम् (ख) ज्ञानभ्रष्टानाम् (ग) विवेकभ्रष्टानाम् (घ) धनभ्रष्टानाम्

(५) ''दैवायत्तं कुले जन्म ...........'' इति सूक्तिः कस्य ?

(क) माघस्य (ख) भारवेः (ग) भर्तृहरेः (घ) भट्टनारायणस्य

(६) के निश्चितार्थात् न विरमन्ति ?

(क) धीराः (ख) वीराः (ग) शूराः (घ) नराः

(७) कः धर्मः योगिनामपि अगम्यः ?

(क) दानधर्मः (ख) सेवाधर्मः (ग) दयाधर्मः (घ) गृहस्थधर्मः

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) कीदृशं वचः दुर्लभम् ?

(२) ''विवेकभ्रष्टानाम् ...........'' इति सूक्तेः प्रसंङ्गे कस्याः नद्याः उल्लेखः अग्नि ?

(३) जन्म कस्य अधीनं भवति ?

(४) का नाम रमणीयता ?

(५) सहसा कार्यकरणेन किं भवति ?

**३. विवेचनात्मकम् उत्तरं लिखत ।**

(१) सत्सङ्गतेः प्रभावात् किं किं भवति ?

(२) 'हितं मनोहारि च दुर्लभं वचः' इति सूक्तिं स्पष्टयत ।

(३) ''विवेकभ्रष्टानां ............'' इति सूक्तेः अर्थविस्तरं कुरुत ।

(४) धीरपुरुषाणां विशेषतां विवेचयत ।

**४. टिप्पण्यः समाधेयाः ।**

(१) न वयस्तेजसो हेतुः ।

(२) तृष्णा न जीर्णा वयमेव जीर्णा ।

(३) रमणीयता ।

(४) सेवाधर्मः ।

**शिक्षकप्रवृत्तिः**

- सूक्तीनां सन्दर्भानुसारेण सम्पूर्णश्लोकं लिखित्वा छात्रान् बोधयत ।

**छात्रप्रवृत्तिः**

- संस्कृतसाहित्ये विद्यमानानां कासाञ्चित् दशसूक्तीनां सङ्ग्रहं कुरुत ।

●

# १३ छन्दांसि

छन्दःशास्त्रं विशालं विद्यते । यथा पादाभ्यां विना गतिर्न भवति तथैव छन्दःशास्त्रं विना काव्ये गतिर्न भवति, तस्मात् कारणात् कथितं वर्तते – ''छन्दःपादौ तु वेदस्य'' इति ।

चन्दयति आह्लादयति चन्द्यतेऽनेन वाइतिचदि आह्लादे धातोः ''चन्देरादेश्च छः'' उणां ४/२१८ इति असुन् चस्य छश्च । छन्दसः द्वौ प्रकारौ स्तः (१) वैदिकच्छन्दांसि, (२) लौकिकच्छन्दांसि च । येषां छन्दसां वैदिकसंहितासु वैदिकसाहित्ये च उपयोगः भवति तानि वैदिकच्छन्दांसि कथ्यन्ते । येषां छन्दसां च प्रशिष्टसंस्कृतसाहित्ये अर्थात् लौकिकसाहित्ये प्रयोगः भवति, तानि लौकिकच्छन्दांसि कथ्यन्ते । अत्र केषाञ्चित् लौकिकच्छन्दसां परिचयः प्रस्तुतः वर्तते । तस्मिन् द्वौ प्रकारौ स्तः । (१) जातिः, (२) वृत्तम् चेति

(१) यत्र मात्राणां गणना कर्तव्या भवति सा जातिः कथ्यते । एतत् मात्राधारितं छन्दः अपि कथ्यते ।

(२) यत्र लघुगुर्वोः निश्चितक्रमप्रमाणेन पादस्य चरणस्य वा अक्षराणां गणना कर्तव्या भवति । तद्वृत्तं कथ्यते ।

एतद् रूपाधारितं छन्दः अपि कथ्यते । वृत्तनाम्ना प्रसिद्धानां छन्दसां त्रयः भेदाः सन्ति ।

(१) समम् (२) अर्धसमम् (३) विषमम्

**ह्रस्वस्वराः** – (अ-इ-उ-ऋ-लृ) ह्रस्वस्वरान्ताश्च ये वर्णाः भवन्ति ते लघुसंज्ञावाचकाः भवन्ति ।

**दीर्घस्वराः** – (आ-ई-ॠ-ए-ऐ-ओ-औ-अं-अः) दीर्घस्वरान्ताश्च ये वर्णाः भवन्ति ते दीर्घसंज्ञावाचकाः भवन्ति ।

क्वचित् ह्रस्ववर्णः – अपि दीर्घतां प्राप्नोति यथा यदा कश्चित् वर्णः अधरेफयुक्तः, सविसर्गः तथा च संयुक्ताक्षरपूर्ववर्ती भवति तदा सःह्रस्वः वर्णः अपि दीर्घः भवति ।

यथा-अर्कः, रामः, सक्थि, अग्निः (इति क्रमेणओदाहरणानि)

अत्र (अ) इति ह्रस्वस्वरत्वात् लघुः, तत्पश्चात् ग् + न् + इ = ग्निः इत्थं ग्न संयुक्ताक्षरत्वात् अकारः ह्रस्वः चेदपि संयुक्ताक्षरपूर्वत्वात् गुरुः भवति पादस्य चरणस्य वा अन्ते आगतः लघुः वर्णः गुरुः भवति । एवमन्यदपि ज्ञेयम् । विकल्पेन उक्तं च;

**संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम् ।**
**विज्ञेयमक्षरगुरुं पादान्तस्थं विकल्पेन ॥**

छन्दःशास्त्रे लघुवर्णस्य कृते (ल) एवं च गुरुवर्णस्य कृते (ग) इति लेखनं भवति । ततः लघुवर्णस्य ज्ञानाय (।) चिह्नं भवति; गुरूवर्णस्य ज्ञापनार्थं (ऽ) इति अवग्रहतुल्यं चिह्नं भवति ।

यथा – कलहंसः (। । ऽ ऽ)

**यतिः** – कस्यापि श्लोकस्य गानसमये पठनसमये वा कस्मिंश्चित् स्थले विरामः कर्तव्यः तद् विरामस्थलं 'यतिः' इति कथ्यते यदा श्लोकस्य चरणं पूर्णतां याति तदा यतिः अनिवार्या भवति । एवं गानस्य पठनस्य वा सारल्यार्थं चरणे यतिः भवति । छन्दसः लक्षणलेखनसमये एतादृशां यतिस्थानानाम् उल्लेखः भवति । यथा – कृष्णाय वासुदेवाय हरये परमात्मने । अस्मिन् श्लोके अष्टमे अक्षरे श्लोकचरणं पूर्णं भवति । अतः तत्र यतिः आगच्छति ।

अर्थात् एतस्य श्लोकस्य पठनसमये कुत्र विरामः कर्तव्यः इति ज्ञानं यत्या भवति । कृष्णाय वासुदेवाय, स्वल्पं विरामं कृत्वा तत्पश्चात् हरये परमात्मने इत्यादिः ।

**गणः** – गणः इत्युक्ते समूहः छन्दश्शास्त्रे श्लोकस्य चरणे आगतानां वर्णानां त्रिकं नाम (त्रयाणां वर्णानां समूहः) भवति स गणनाम्ना ज्ञायते । तादृशाः त्रिकपूर्णाः अष्टौ गणाः सन्ति । तेषां ज्ञानाय अत्र गणसूत्रं स्थाप्यते ।

**गणसूत्रम्** - य मा ता रा ज भा न स ल गम् ।

अधोलिखितकोष्ठके सूत्रस्य परिचयो दीयते ।

| **क्रमः** | **गणनाम** | **स्वरूपम्** |
|---|---|---|
| १. | यगण | ।ऽऽ |
| २. | मगण | ऽऽऽ |
| ३. | तगण | ऽऽ। |
| ४. | रगण | ऽ।ऽ |
| ५. | जगण | ।ऽ। |
| ६. | भगण | ऽ।। |
| ७. | नगण | ।।। |
| ८. | सगण | ।।ऽ |
| | ल-लघु- | (।) |
| | गम्-गुरु | (ऽ) |

**( १ ) अनुष्टुप् छन्दः**

**लक्षणम्** -

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।**
**द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥**

**अन्वयः** - श्लोके सर्वत्र पञ्चमं लघु, षष्ठं च गुरूः द्विचतुष्पादयोः सप्तमं ह्रस्वम्, अन्ययोः (प्रथमतृतीययोः) सप्तमं दीर्घं ज्ञेयम् ।

**भावार्थः** - यस्मिन् छन्दसि चतुर्षु चरणेषु पञ्चमम् अक्षरं लघु एवं षष्ठम् अक्षरं गुरु स्यात् । एवं द्वितीयचतुर्थचरणयोः सप्तमम् अक्षरम् लघु स्यात् । एवं प्रथमतृतीयतरणयोः सप्तमम् अक्षरं गुरु स्यात् । तद् अनुष्टुप् छन्दः कथ्यते ।

**उदाहरणम्** -

**सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे।**
**तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः ॥**

**( २ ) आर्याछन्दः**

**लक्षणम्** -

**यस्याःपादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।**
**अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥**

**अन्वयः** - यस्याः प्रथमे पादे तृतीयेऽपि पादे द्वादश मात्राःभवन्ति द्वितीये पादे अष्टादश मात्राः भवन्ति चतुर्थके पादे च पञ्चदश मात्राः भवन्ति तत् आर्या छन्दः भवति ।

**भावार्थः** - यस्मिन् छन्दसि प्रथमपादे तृतीयेऽपि पादे द्वादश मात्राः भवन्ति । द्वितीयपादे अष्टादश मात्राः भवन्ति । एवं चतुर्थके पादे च पञ्चदश मात्राः भवन्ति । तच्छन्दः आर्या ।

**उदाहरणम् -**

**आपरितोषाद् विदुषां**
२,१,१,२,२, १,१,२,

**न साधु मन्ये प्रयोगविज्ञानम् ।**
१, २,१, २,२, १,२,१,२,२,२,

**बलवदपि शिक्षितानां -**
१,१,१,१,१, २, १,२,२,

**मात्मन्यप्रत्ययं चेतः॥**
२,२,२,२,१,२, २,२,

अत्र इदमपि अवधेयम्

**एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ॥**

एकमात्रिकवर्णः ह्रस्वः भवति । द्विमात्रिकवर्णः दीर्घः कथ्यते । तथा त्रिमात्रिकप्लुतः ज्ञेयः । स्वररहितं व्यञ्जनम् अर्धमात्रायुक्तं ज्ञेयम् ।

**(३) इन्द्रवज्रा छन्दः**

**लक्षणम् - स्यादिन्द्रवज्रा यदि तौ जगौ गः ।**

**भावार्थः** - यस्मिन् छन्दसि प्रत्येकं चरणेषु क्रमेण तगणः, तगणः, जगणः द्वौ गुरू च भवन्ति, तद् इन्द्रवज्राछन्दः कथ्यते । आहत्य प्रत्येकं चरणेषु एकादशाक्षराणि भवन्ति ।

**उदाहरणम् -**

**श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव ।**
ऽ ऽ । ऽ ऽ । ।ऽ ।ऽ।

**जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेऽति ॥**

**(४) उपजातिः छन्दः**

**लक्षणम् -**

**अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः ।**
**इत्थं किलान्यास्वपि मिश्रितासु, वदन्ति जातिष्विदमेव नाम ॥**

**भावार्थः** - इन्द्रवज्रावृत्ते आद्यः गुरुः भवति । तथा च उपेन्द्रवज्रावृत्ते आद्यः वर्णः लघुः भवति । एतावान् एव द्वयोः वृत्तयोः मध्ये भेदः तथा च यत्र आद्यवर्णे कुत्रचित् लघुत्वं कुत्रचित् गुरुत्वं भवति । तत् वृत्तम् उपजातिनाम्ना ज्ञायते । उपजातिवृत्तं नाम इन्द्रवज्रा-उपेन्द्रवज्रावृत्तयोः मिश्रणम् इति भावः ।

**उदाहरणम् -**

**अथप्रजानामधिपः प्रभाते - उपेन्द्रवज्रा**
।ऽ। ऽ ऽ । ।ऽ ।ऽ ऽ

**जाया प्रतिग्राहितगन्धमाल्याम् । - इन्द्रवज्रा**
ऽ ऽ ।ऽ ऽ । । ऽ।ऽ ऽ

**वनाय पीतप्रतिबद्धवत्सां - उपेन्द्रवज्रा**

**यशोधनोधेर्नुमृषेर्मुमोच ॥ - उपेन्द्रवज्रा**

**( ५ ) तोटकछन्दः**

**लक्षणम् - वद तोटकमब्धिसकारयुतम् ।**

**भावार्थः** - यस्मिन् छन्दसि प्रत्येकं चरणेषु चत्वारः सगणाः भवन्ति, तत् तोटकं छन्दः कथ्यते । अस्मिन् छन्दसि प्रतिचरणं द्वादशाक्षराणि भवन्ति ।

**उदाहरणम्** -

**अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।**
। । ऽ । । ऽ । । ऽ । । ऽ

**हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥**

**( ६ ) भुजङ्गप्रयातं छन्दः**

**लक्षणम् - भुजङ्गप्रयातं चतुर्भिर्यकारैः ।**

**भावार्थः** - यस्मिन् छन्दसि प्रत्येकं चरणेषु क्रमशः चत्वारः यगणाः भवन्ति, तद् भुजङ्गप्रयातं छन्दः कथ्यते । श्रीमच्छङ्कराचार्यविरचितस्य श्रीगुर्वष्टकस्तोत्रस्य पद्यम्,

**उदाहरणम्** -

**षडङ्गादिवेदो मुखे शास्त्रविद्या**
। ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ

**कवित्वादिगद्यं सुपद्यं करोति ।**

**गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं**

**ततः किं ततः किं ततः किं ततः किम् ॥**

**अथवा**

**न तातो न माता न बन्धुर्न दाता**

**न पुत्रो न पुत्री न भृत्यो न भर्ता ।**

**न जाया न विद्या न वृत्तिर्ममैव**

**गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥**

**( ७ ) शिखरिणी छन्दः**

**लक्षणम्** - रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी

**भावार्थः** - यस्मिन् छन्दसि प्रत्येकं चरणेषु क्रमेण - यगणः, मगणः, नगणः, सगणः, भगणः एवम् अन्ते एकः लघुः एकः च गुरुः भवति, तद् शिखरिणी छन्दः उच्यते । अस्मिन् छन्दसि आहत्य सप्तदशाक्षराणि भवन्ति । रसैः = षड्भिः (षड्रसाः) रुद्रैः = एकादशभिः (एकादशरुद्राः) वर्णैः यतिः भवति ।

**उदाहरणम्** -

**महिम्नः पारं ते परमविदुषो यद्यसदृशी**
। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ

**स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।**

**अथावाच्यः सर्वः स्वमतिपरिणामावधिगृणन्**

**ममाप्येष स्तोत्रे हरनिरपवादः परिकरः ॥**

**( ८ ) मन्दाक्रान्ता छन्दः**

**लक्षणम् - मन्दाकान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।**

**भावार्थः** - यस्मिन् छन्दसि प्रत्येकं चरणेषु क्रमणे - मगणः, भगणः, नगणः, तगणः, तगणः, द्वौ गुरूच भवन्ति, तद् मन्दाक्रान्ता छन्दः कथ्यते । अत्र आहत्य सप्तदशाक्षराणि भवन्ति । अम्बुधिभिः = चतुर्भिः, रसैः = षड्भिः, नगैः = सप्तभिः वर्णैः 'यतिः' भवति ।

**सङ्ख्यावाचकसंज्ञा**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| पृथिवी | = | एका | हस्तौ | = | द्वौ | गुणाः | = | त्रयः | अब्धिः | = | चत्वारः |
| वेदाः | = | चत्वारः | भूतानि | = | पञ्च | रसा | = | षट् | मुनयः | = | सप्त |
| वसवः | = | अष्टौ | ग्रहाः | = | नव | दिशः | = | दश | रुद्राः | = | एकादश |
| सूर्याः आदित्याः | = | द्वादश | अश्वाः | = | सप्त | नगाः | = | सप्त | अम्बुधिः | = | चत्वारः |

**उदाहरणम् -**

**शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं ।**
ऽ ऽ ऽ ऽ  । । । । । ऽ  ऽ । ऽ ऽ  । ऽ ऽ

**विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।**
**लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं**
**वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥**

**( ९ ) शार्दूलविक्रीडितं छन्दः**

**लक्षणम् - सूर्याश्वैर्यदि मः सजौ सततगा शार्दूलविक्रीडितम् ।**

**भावार्थः** - यस्मिन् छन्दसि प्रत्येकं चरणेषु क्रमशः - मगणः, सगणः, जगणः, सगणः, तगणः, तगणः, गुरुश्च भवन्ति तद् शार्दूलविक्रीडितं छन्दः कथ्यते । अत्र आहत्य एकोनविंशतिः अक्षराणि भवन्ति । एवञ्च सूर्यैः = १२ - अश्वैः - ७ वर्णैः यतिः भवति ।

**उदाहरणम् -**

रामरक्षास्तोत्रे

**रामो राजमणिः सदा विजयते रामं रमेशं भजे**
ऽ ऽ  ऽ । । ऽ  । ऽ  । । । ऽ  ऽ ऽ  । ऽ ऽ  । ऽ

**रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।**
**रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं**
**रामे चित्तलयः सदा भवतु मे भो राम ! मामुद्धर ॥**

**( १० ) स्रग्धरा छन्दः**

**लक्षणम् -**

**म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।**

**भावार्थः** - यस्मिन् वृत्ते मगणः, रगणः, भगणः, नगणः, त्रयः यगणाः भवन्ति ।

त्रिमुनियतियुता = त्रिः = त्रिवारं मुनिभिः = सप्तभिः अक्षरैः यतिः भवति । तत् स्रग्धरा छन्दः कथ्यते । अत्र आहत्य एकविंशतिः वर्णाः भवन्ति ।

**उदाहरणम् -**

अभिज्ञानशाकुन्तलस्य मङ्गलाचरणम्

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
ऽ  ऽ ऽ  ऽ । ऽ ऽ  । । ।  । । । ऽ  ऽ  । ऽ ऽ  ।  ऽ ऽ

**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥**

## स्वाध्यायः

**१. प्रदत्तेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(१) कस्मिन् छन्दसि सर्वत्र पञ्चमं लघु भवति ?
(क) आर्या (ख) अनुष्टुप् (ग) इन्द्रवज्रा (घ) उपजातिः

(२) 'यदि तौ जगौ गः' इति कस्य लक्षणमस्ति ?
(क) अनुष्टुप् (ख) इन्द्रवज्रा (ग) उपजातिः (घ) तोटकम्

(३) इन्द्रवज्राछन्दसि कति अक्षराणि भवन्ति ?
(क) १२ (ख) १३ (ग) ११ (घ) १५

(४) ''श्रीकृष्ण गोविन्द'' इति श्लोके किं छन्दः ?
(क) इन्द्रवज्रा (ख) उपजातिः (ग) आर्या (घ) मन्दाक्रान्ता

(५) कस्मिन् छन्दसि चत्वारः सगणाः भवन्ति ?
(क) शिखरिणी (ख) स्रग्धरा (ग) तोटकम् (घ) उपजातिः

(६) कस्मिन् छन्दसि चत्वारः यगणाः भवन्ति ?
(क) भुजङ्गप्रयातम् (ख) अनुष्टुप् (ग) तोटकम् (घ) आर्या

(७) महिम्नः स्तोत्रं कस्मिन् छन्दसि अस्ति ?
(क) भुजङ्गप्रयातम् (ख) शार्दूलविक्रीडितम् (ग) तोटकम् (घ) शिखरिणी

(८) कस्मिन् छन्दसि एकविंशतिवर्णाः सन्ति ?
(क) स्रग्धरा (ख) मन्दाक्रान्ता (ग) अनुष्टुप् (घ) भुजङ्गप्रयातम्

**२. एकेन वाक्येन उत्तरं लिखत ।**

(१) छन्दसः कौ द्वौ भेदौ स्तः ?
(२) लौकिकच्छन्दसां द्वौ प्रकारौ लिखत ।
(३) वृत्तनाम्ना ख्यातच्छन्दसां कति भेदाः सन्ति ?
(४) गणपरिचयात्मकं सूत्रं किम् ?
(५) मगणस्य स्वरूपं किम् ?
(६) 'सच्चिदानन्दरूपाय' इत्यत्र किं वृत्तम् ?

**३. विवेचनात्मकम् उत्तरं लिखत ।**

(१) किमक्षरं गुरु ज्ञेयमिति विवेचयत ।
(२) यतिविषये विवेचनं कुरुत ।
(३) गणविषये विवेचनं कुरुत ।
(४) वर्णस्य ह्रस्व-दीर्घ-प्लुतात्मकं परिचयं लिखत ।

**४. अधोलिखितच्छन्दसां लक्षणमुदाहरणं च लिखत ।**

(१) इन्द्रवज्रा (२) उपजातिः (३) भुजङ्गप्रयातम् (४) मन्दाक्रान्ता (५) शार्दूलविक्रीडितम्

**शिक्षकप्रवृत्तिः**

- विविधवृत्तानाम् पद्यानां गानं गायनस्य ।

**छात्रप्रवृत्तिः**

- विविधवृत्तानाम् पद्यानां मात्रागणना, गणगणना च ।

• • •